938

২.৭ ৪৫৬

4६6

॥ श्रीः ॥

वामननामकौमुदी

भगवदभिधानवामनपदस्य द्विचत्वारिंशदधिकशतार्थ-
प्रकाशिका

नेपालदेशीयेन काशीनिवासिना अर्ज्यालोपाह्व-
श्रीमदुमानाथविदुषा
विरचिता ।

नेपालाभिजनपण्डितश्रीविष्णुप्रसादशर्मणा
संशोधिता ।

श्रीमता नेपालदेशीयपण्डितहर्षनाथोपाध्यायेन निजव्ययेन
काश्यां विद्याविलासनाम्नि यन्त्रालये मुद्रयित्वा
प्रकाशं नीता ।

विनामूल्यं ग्रन्थकर्तृसकाशात्
लभ्या ।

८६६

* श्रीः *

वामननामकौमुदी

भगवदभिधानवामनपदस्य द्विचत्वारिंशदधिकशतार्थ-प्रकाशिका

नेपालदेशीयेन काशीनिवासिना अर्ज्यालोपाह्व-श्रीमदुमानाथविदुषा विरचिता ।

नेपालाभिजनपण्डितश्रीविष्णुप्रसादशर्मणा संशोधिता ।

श्रीमता नेपालदेशीयपण्डितहर्षनाथोपाध्यायेन निजव्ययेन काश्यां विद्याविलासनाम्नि यन्त्रालये मुद्रयित्वा प्रकाशं नीता ।

१९३० विनामूल्यं ग्रन्थकर्तृसकाशात् लभ्या ।

भूमिका ।

इह खलु सर्वोऽपि लोकसमूहः सुखमेवानुकूलतया जानँस्तत्प्राप्तय एव यतते दुःखं तु प्रतिकूलतया जानँस्तत्प्रतीकाराय प्रयतमानो दरीदृश्यते । सुखं च नहि पुण्यमन्तरेण प्राप्यते पुण्यं चानुष्ठानं विना नैव लभ्यते तच्चातिक्लेशेनैव साध्यते । एवं सति अहं तु आमयावी व्यतीतषट्षष्टिहायनः क्लेशासमर्थोऽस्मीति विचार्य श्रीभगवन्नामोच्चारणं सुखजन्यमिति मन्यमानो "हरेर्नामैव नामैव" इति नारदवचनं च स्मरन् श्रीभगवन्नामोच्चारणेनैवात्मानमसारसंसारसमुद्रादुद्धर्तुकामः श्रीवामनावतारेष्वतीव दयालुं स्मरन् वामनपदार्थान् कैरपि पुरष्टीकाकृद्भिरप्रकाशितान् स्वकौतुकाय प्रकाशयामि । श्रीभगवन्नाम वामनपदं न ह्रस्वार्थमात्रपरम् । भङ्गाभङ्गसङ्कीर्णश्लेषादिना नानार्थपरमेव । एतदर्थाश्च श्रीवामनपादानुग्रहेणैव ज्ञायन्ते नान्यथा । एष्वर्थेषु बुधैर्मात्सर्यमुत्सार्य कल्मषदूरीकरणाय दृष्टिर्देया ।

सङ्कीर्णश्लेषो निबन्धेषु मूले लक्षणालक्षितोऽपि अभूतोपमादिवज्ज्ञातव्यः यथा गूढश्लेषः । आक्षिप्तश्लेषश्च तथा । सङ्कीर्णश्लेषे हि पूर्वं पदद्वयस्यान्यत्रान्वये पश्चादर्थसौन्दर्यबलेन एकपदस्यान्यत्रान्वयस्तद्धटकान्यस्य तु नान्वययोग्यता तस्मात्तस्य वैयर्थ्यम् । एकदेशान्वयश्च कथमिति तु न शङ्कनीयम् । एकवारं विशिष्टान्वयेन तत्सार्थक्यात् । यथा "ऊचे ह्रियोऽपि श्लथितानुरोधा" (स० ३ श्लो० ७४) इति श्रीहर्षपद्ये विभक्तिश्लेषोदाहरणे ह्रिय(१)इत्यस्य पञ्चम्यन्तत्वपक्षे षष्ठ्या आनर्थक्यम्, तस्यैव षष्ठ्यन्तत्वपक्षे पञ्चम्या आनर्थक्यं स्यात्तस्मात्सङ्कीर्णश्लेषे पक्षेऽन्वयेन सार्थक्यम् । एकदेशान्वयोऽपि न दोषमावहति नानार्थप्रतीतिजचमत्कारबलादेकदेशान्वयस्यादूषितत्वात् । नहि तदेकदेशत्वेनापि व्यवह्रियते भिन्नस्यापि पदत्वात् ।

किञ्च नित्यसाकाङ्क्षितार्थस्यैकदेशवाचकस्याप्यन्वयस्य पूर्वाचार्यश्रेण्यारूढत्वात् । देवदत्तस्य गुरुकुलमितिवत् ।

---

(१) ह्रियोऽनुरोधा लज्जाश्रयी सा भैमी ह्रियो लज्जायाः सकाशात् श्लथिता च्युता सती ऊचे लज्जां त्यक्त्वा कथयामासेत्यर्थः । ह्रिय इत्यत्र विभक्तिश्लेषेणायमर्थ इति प्रत्नविद्वत्सम्प्रदायः ।

किञ्च गमकत्वात्समास इति सिद्धान्तादेतादृशस्थले समासोऽपि सम्पन्नः। वृत्तिविग्रहयोः समानप्रकारोपस्थितिजनकत्वं गमकत्वम्। अतः शिवभागवत इति प्रयोग इतिदिक्।

एवं "दर्शैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" इत्यत्र तत्पदेन समासविशिष्टराजपदार्थस्य परामर्शः।

किञ्च "एत्येधत्यूठ्सु" (६।१।८९) इत्यत्र समस्यमानपदान्तर्गताभ्यामपि एत्येधतिभ्यामेवैजादित्वं सम्बध्यते न तु विशिष्टेन।

किञ्च एकदेशे स्वरितत्वं प्रतिज्ञाय एकदेशान्वयोऽपि आचार्यसम्मतः। एवं दृशिग्रहणबलादनेककार्यं निर्वहन्ति आचार्याः। कुत्रचिद्योगविभागेनापि। नहि साकल्येन परिष्कर्तुमीशते कार्यनिर्वाहायैवानेकं पन्थानमारोहन्ति। एवमालङ्कारिका अपि अर्थसौन्दर्यबलेन गूढश्लेषः, आक्षिप्तश्लेष अभूतोपमा इत्यादि नाममात्रं वदन्ति न तु साकल्येन परिष्कारं प्रदर्श्य व्यवस्थापयन्ति। विविधश्लेषस्य यत्र प्रवेशस्तत्र सङ्कीर्णश्लेषव्यवहारः। शब्दैक्येऽपि एकवृन्तगतफलद्वयन्यायेनार्थश्लेषः स इति यावदिति पूज्यपादमतम्। तस्माच्छ्रीवामनःपदमनन्तार्थपरं न कमपि दोषमावहति। कदाचित्सत्यपि एकदेशान्वयादिदोषे न स दोषो दोषायालम्। सकृन्नामोच्चारणमात्रेणानन्तजन्मदुष्कृतिर्नश्यति(१) "हरिस्मृतिः सर्वविपद्विमोक्षणम्" इति दर्शनात् एकार्थज्ञानेनैवानेकजन्मकलुषं नश्यत्येव। अनेकार्थप्रदर्शनं तु मुहुर्मुहुः स्वकौतुकायैवेत्यलं पल्लवितेन।

अत्रायं विचारः। मनःसद्भावे स्वनामैव लिङ्गमिति बोधयन् वामन इतिनाम्ना प्रथितो नारायणोऽवततार। एतच्चान्तःकरणपदवाच्यमवश्यमभ्युपेयम्। अनभ्युपगम्यमाने मनसि तु नित्यानुपलब्ध्युपलब्धिदोषः प्रसज्येत। प्रत्यक्षसाधनानामात्मेन्द्रियविषयाणां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत। यदि हेतुसमवधानेऽपि निष्फलोत्पत्तिरित्युच्यते तर्हि नित्यानुपलब्धिः प्रसज्येत। नचैवं दृश्यते। कारणसमवधाने कार्योत्पत्तिरेव दृश्यते। आत्मेन्द्रिययोर्मध्ये एकस्य शक्तिप्रतिबन्धोऽभ्युपेतव्यः। यथा मण्यादिना शक्तिप्रतिबन्धात्सत्यपि वन्हौ दाहानुत्पत्तिः। तथाच नोक्तदोष इत्यपि नैव वक्तव्यम्। आत्म-

---

(१) कूपखननन्यायात्।

नोऽविक्रियत्वान्न तस्य शक्तिप्रतिबन्धो युज्यते, नापीन्द्रियस्य शक्तिप्रतिबन्धो युज्यते प्रतिबन्धकाभावात्। तर्हि पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्तिकस्य ततोऽकस्माच्छक्तिः प्रतिबध्यते। नच दृष्टसामग्र्यां सत्यामदृष्टं प्रतिबन्धकमितियुक्तम्। अतिप्रसङ्गात्। न च व्यासङ्गः प्रतिबन्धकम्। मनोऽसत्त्वे तस्यासम्भवात्। तथाहि रसादीनां सहोपलब्धिप्राप्तौ रसबुभुत्सारूपो व्यासङ्गो रूपाद्युपलब्धिप्रतिबन्धको वाच्यः। स च गुणत्वाद्रूपवद्गुण्याश्रयः। तत्रात्मनोऽसङ्गनिर्गुणकूटस्थस्य गुणित्वायोगान्मन एव गुणित्वेनैष्टव्यमिति व्यासङ्गानुपपत्त्या मनःसिद्धिः। तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः। अवधानं बुभुत्सा। नचानिच्छतो दुर्गन्धाद्युपलम्भान्न बुभुत्सोपलब्धिर्नियामिकेतिवाच्यम्। अनेकविषयसन्निधौ क्वचिदेव तस्या नियामकत्वाङ्गीकारात्। येषां मते पुनरिच्छादीनामात्मधर्मत्वं तेषां मनो दुर्लभमिति मन्तव्यम्। इच्छादिधर्मिणैवात्मना व्यासङ्गोपपत्तेः। एतद्बोधनायैव वाशब्दः। व्यासङ्गस्य मानसत्वे "अन्यत्रमना अभूवं नाश्रौषम् अन्यत्रमना अभूवं नादर्शम्" "मनसा ह्येव पश्यति मनसा शृणोति" इति च। तस्माच्छ्रुत्यनुभवसिद्धमनोबोधनाय उपलब्ध्यनुपलब्धी च तस्यैव द्वौ धर्मावितिबोधनाय वापदम्। मनःसद्भावे "नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा" (२।३२) इति व्याससूत्रं च मानमिति बुधा वित्त। एतद्बोधनायैव वामननाम्ना हरिरवततारेति सर्वमवदातम्।

किञ्च विकल्पार्थकवाशब्देनोपलब्ध्यनुपलब्धिबोधकेन मनः प्रसाध्य वापदस्यावधारणार्थकत्वपक्षे मन एव सर्वमित्यर्थः। "वैवमवधारणवाचकाः" इत्यमरः। "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इतिस्मृतेः। कामादयश्चास्य वृत्तय इति श्रुतिर्दर्शयति "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एवेति" एतद्बोधयन् वामन इति नाम्ना हरिः प्रादुर्बभूवेति तात्पर्यम्।

श्रीवामनावतारं गृह्णता पादत्रितयेन जगद्व्याप्तं तादृशस्य भगवतो नाम्नोऽशेषमर्थं सहस्ररसनोऽपि शेषो वक्तुं नालं का कथा स्वल्पशेमुषीणामस्माकं प्राकृतानामिति विदुषः प्रार्थये। न हीमेऽर्थाः स्वकपोलकल्पिताः किन्तु श्रुतिस्मृतिपुराणप्रसिद्धा एवानूद्यन्ते वामनपदस्यार्थस्वाभावात्र दोषदृष्टिपरं मनो विद्वद्भिः कर्त्तव्यम्। अश्रद्धापि नैव क-

3659

त्तव्या। "अश्रद्धया हुतं दत्तम्" इतिभगवद्वचनं स्मर्त्तव्यमिति प्रार्थये।

किं च

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते।
ध्यायतो विषयानस्य स्वप्नेऽनर्थाऽगमो यथा॥

इति स्मृतिः,

दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते।
यथा रज्जौ सर्पबुद्धिर्जायते त्वविवेकतः॥

इति (१)वचनं च मुहुर्मुहुः स्मर्त्तव्यम्।

अस्य प्रबन्धस्य मुद्रणसमये प्रूफशोधनकृत्यभारं गृह्णता भण्डार्युपाह्वपण्डितश्रीविष्णुप्रसादशर्मणा बहूपकृतमिति तं प्रति शतशो धन्यवादाः।

अस्य प्रकाशनकार्येऽर्थसाहाय्यं कृतवते सुकृतवते श्रीमते पण्डितहर्षनाथोपाध्यायमहोदयाय बहुशो धन्यवादा अपि न तदीयानुपमौदार्यपर्यवसाय्यर्थानुरूपा इति बहुलार्थपर्यवसायिपद्यमेवोपहारीकृत्यानृणीभवितुमिच्छामि।

तद्यथा—

हरिनामपरो धर्म इति जानन् सदा सुधीः।
हर्षनाथाभिधो भक्तो मुद्रयामास कौमुदीम्॥१॥
वामनस्य हरेर्नाम्नो नानार्थप्रतिपादनीम्।
स्वस्वस्य सफलं कुर्वन्नहो अस्य सुभाग्यता॥२॥

अस्यार्थः—

सदा नित्यः परो मुख्यो धर्मो हरिनाम। यद्वा हरिनामपर इत्येकं पदम्। सदा वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मो हरिनामैवोत्तमः। यज्ञादिजन्यधर्मस्य तु नित्यत्वाभावेन न परत्वम्। "क्षीणे पुण्ये मर्त्य-

(१) अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा। तत्कर्मसङ्कल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात्॥ इति चार्षभकवरोक्तिः स्मर्त्तव्या।

लोकं विशन्ति" इति श्रवणात् । सर्वोऽपि धर्मो हरिनाम्नि परस्तत्परः । धर्मफलं हरिनामोच्चारणमेवेत्यर्थः । हरिनामोच्चारणसिद्धय एव धर्मः कर्त्तव्य इत्याशयः । स्वस्वस्येति कर्मणः शेषत्वविवक्षायां षष्ठी । सफलमिति क्रियाविशेषणम् । फलयुक्तं यथा स्यात्तथा स्वस्वं स्वकीयधनं कुर्वन् । यद्वा स इति पृथगस्तु । तथा च न सफलमिति कस्यापि विशेषणम् । आत्मधनस्य फलं कुर्वन् कार्यं कुर्वन् प्रस्तुतत्वान्मुद्रणमेव तत्कार्यं सम्पादयन् । यद्वा सफलमिति सादृश्येऽव्ययीभावः । सहशब्दोऽपि सदृशवचनोऽस्ति सदृशः सख्या ससखीति यथा । एवं चात्मधनस्य तुल्यफलं कुर्वन्नित्यर्थः । अस्येत्यनेनात्मधनस्य आत्मनश्च सङ्ग्रहः । तथा च धनस्यात्मनश्चोभयोः सुभाग्यत्वम् । "परारातिः" इति कोशदर्शनेन परशब्दस्य शत्रुवाचकत्वेऽपि प्रसिद्धिः । परो धर्म इत्यत्र अधर्म इति पदच्छेदोऽपि भवितुमीष्टे । अधर्मः पुण्येतरः हरिनाम्नः परः प्रतिपक्ष एवेत्यर्थः । सदापदस्य पूर्वान्वयिता सदा हरिनामपर इति । अधर्मभगवदभिधानयोः साहजिकविद्वेषसद्भावात् तेजास्तिमिरयोरिव सहानवस्थानलक्षणासामानाधिकरण्यादिति भावः । यद्वा अधर्म इति च्छेदः । तथाच न विद्यते धर्मो यस्मादितिबहुव्रीहौ उत्तमातिशयोऽभिव्यज्यते । एतादृशः परः उत्कृष्टो धर्मो हरिनामैव । भङ्गश्लेषबलादयमर्थः । यद्यपि यज्ञादिजन्योऽपि धर्म एव तथापि हिंसादिसाङ्कर्याद्दुष्करत्वाच्च न तस्योत्तमोत्तमत्वम् । परो धर्म इत्यत्र अधर्म इति च्छेदः । अशब्दो हि वासुदेवपरः "अकारो वासुदेवः स्यात्" इति कोशात् । अखिलवस्तुजातस्य जगति विद्यमानस्य ज्यायान् धर्मोऽहमेवेति । "पुण्यो गन्ध" इत्यादिनोक्तेः । अधर्मो वासुदेवः तन्नाम परोऽन्यो धर्म इत्यन्वयः ।

स्वकौतुकायार्थान्तराणि प्रदर्श्यन्ते । तथाहि लोके शब्दानामर्थपरत्वमेव प्रसिद्धम् । घटादिशब्दा हि कम्बुग्रीवादिमन्तं बोधयन्तः सार्थकाः स्वयं निवर्त्तन्ते न तु स्वजन्यबोधे स्वरूपं विषयीकुर्वन्ति ।

शास्त्रे तु अर्थे कार्यबाधादर्थविशिष्टस्वरूपपरत्वमिति बोधयन् पाणिनिः "स्वं रूपं" इति परिभाषणं निजगाद । एवं सति "नवेति विभाषा" इत्यत्र नवाशब्दयोरेव विभाषासंज्ञायां महदनिष्टं स्यादिति तत्रेतिशब्दोपादानं चकार। स चार्थविपर्यासकारी । तथाच शब्दपरस्याप्यर्थपरत्वं बलाच्चकार । गवित्ययमाहेत्यादौ तु तद्बलादेव शब्दपरत्वम्, प्रकृते इतिबलादेव । "नलोकाव्यय" इतिकर्मषष्ठ्या निषेधेऽपि न द्वितीया तेन कर्माभिधानात् "नारद इत्यबोधि" इतिवत् । अत्र हरिनामपर इत्यत्र हरिनाम्नः परो भिन्नः अरातिर्वा धर्म इति जानन् पुमान् सदाऽसुधीरिति योजना । मा भवतु सुधीः कानिष्टावाप्तिरितिचेत् । स इति पृथक्पदम् दा ऽसुधीरित्येकं पदम् । दा इति क्विबन्तो विजन्तो वा दाप् लवने दो अवखण्डने । आत्मघाती असुधीः । कर्मधारयः। आत्मघातिनो नेहपरलोकौ शं भवतः । "आत्मैव ह्यात्मनो बन्धुः" इत्यादिना तन्निन्दाया भगवतोक्तत्वात् । "सर्वं ज्ञानप्लवेनैव" इत्यादिना ज्ञानस्यैव महिमा वर्णितः । "ज्ञाने परिसमाप्यते' इत्यादिना च। यद्वा सदासुधीरित्येकं पदम् । संसारच्छेदिनी बुद्धिर्दाः तया सह आगतः स चासौ सुधीरिति 'तेन सह" इति बहुव्रीहौ सहस्य सः । यद्वा सुष्ठु धीः सुधीः सदा नित्या सुधीः सुबुद्धिर्यस्येतिबहुव्रीहिः । यद्वा इति जान् पुमान् सदा असुधीः। असवः प्राणा धीर्यस्यैतादृशो भवति। ज्ञानिनामुत्क्रमणस्याप्रसिद्धेः । मृतोप्यमृत एव भवतीति भावः। इहैव तस्य प्राणाः। "न तस्य प्राणा ह्युत्क्रामन्ति इहैव समवलीयन्ते" इति श्रुतेः, "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" इत्यादिस्मृतेश्च । यद्वा जानन् सदासुधीः नित्यपण्डितः। एतेन कार्यकाले पाण्डित्यं प्रदर्शयतो व्युदासः। इति समाप्तो भवति । "ज्ञाने परिसमाप्यते" "श्वपचस्य गृहेऽथवा" "शुनि चैव श्वपाके च" इत्यादिना नित्यज्ञानी प्रशस्यते । इति समाप्तिपरः । तेन संसारः समाप्यते "न स पुनरावर्त्तते" इति श्रुतेः ।

"इतिहेतुप्रकरणप्रकर्षादिसमाप्तिषु" इति कोशः । प्रकर्षाद्यर्थोऽपि कल्पनीयः । स एव प्रकर्षो भवतीत्यादिः । यद्वा सदासुधीरिति कर्मधारयः । डुदाञ्दाने क्विबन्तो विजन्तो वा । दानेन सह वर्त्तते इति सदाः सुधीरेव दानं करोति स एव दानमहिमानं जानाति सर्वतन्त्रेषु दानमेव मुख्यतया गण्यते । यतः आप्तकामोऽपीश्वरो दानमेवाभिलष्यति "पत्रं पुष्पं" इत्यादिना दानमेव हरये रोचते । मुख्यतया दानमेव प्रशंसन्ति । "दानं भोगो नाश" इत्यादिना लोकेऽपि धनस्य दानमेव मुख्यं फलम् । यद्वा धर्मे इति सप्तम्यन्तमस्तु विषयत्वं सप्तम्यर्थः तथाच धर्मविषये हरिनामपरः सदासुधीर्भवतीति जानन् हर्षनाथाभिध इत्युत्तरेणान्वयः । यद्वा सदेत्यत्र सत् आ इति च्छेदः । आ इति अभिविधौ । तथाच हरिनाम आसत् व्यापकं सन् त्रिकालाबाध्यम् । अत एव परो धर्मः, यज्ञादिजन्यधर्मस्य नश्वरत्वाद्-व्यापकत्वाद्बाध्यत्वाच्च न परत्वमिति जानन् । यद्वा सदापदे आरोहण-क्रमेण पाठे हेदासेति सम्बोधनम् । हेहरिदास ! त्वं न दासमात्रमपि तु भक्तः सन् पुनः सुधीः सन् हरिनामपरो धर्म इति जानन् हर्षनाथाभिध इत्यन्वयः । यद्वा सदेत्यस्यैकपदत्वपक्षेऽपि हरिनामपदेन तस्यान्वयोऽस्तु हरिनाम नित्यमित्यर्थः । अत एव मुक्तिक्षेत्रेऽपि काश्यां शिवीभूतमपि शवं 'रामनाम सत्यहैं' इति वदन्तो नयन्ति । अत्रायं विचारः । हरिनाम्न एव परत्वादोङ्कारात्पूर्वमेव तदुच्चार्य संहितां पठन्ति । ओङ्कारो हि वेदादिः । अतः ओंतत्सदिति निर्देशेन कर्माणि क्रियन्ते 'ओं तत्स-दितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इतिभगवदुक्तिः । ॐङ्कारस्यापि हरिनामेवादिः । अतः हरिः ॐमिति पूर्वमुच्चार्यैव वेदाध्ययनम् । अतस्तदध्ययने स्वराद्युच्चारवैपरीत्यजनितपाप्मापि निवर्त्तते । अत एव "यस्य स्मृत्या" इति कर्मान्ते पठन्ति । तत्र तत्र श्राद्धादिविधौ हरिस्मरणमिति दृश्यते । "हरेर्नामैव" इतिनारदवचनं चान्यथानुपपत्त्या

वरीवर्त्ति । हरिन्नामेत्यत्र षष्ठीसमासपक्षे हरिसम्बन्धिविष्णवादिनाम्नोऽपि ग्रहणम् । परं तु तत्पक्षे लक्षणापत्त्या कर्मधारय एव कर्त्तव्यः । अभेदश्च न संसर्ग इति महालाघवम् । हरिरित्येतन्नामप्रातिपदिकम् । नामपदं तत्र रूढम् । अतस्तन्नाम स्यात्तदर्थकमिति जगदीशाः । ननु लोके अर्थबोधनायैव शब्दः प्रयुज्यते । एवं च तदर्थस्यैव परत्वं स्यात् कथं नाम्नः परत्वमितिचेत्, अत्र केचित् । शब्दार्थयोरभेदव्यपदेशात् गुणगुणिनोरिवेति तदाशयः । नन्वेवमग्निशब्दोच्चारणेऽपि तेन जिह्वा दह्यत मधुशब्दोच्चारणेऽपि जिह्वाया माधुर्यप्रसङ्गः स्यादितिचेद्भेद-सहिष्णुरभेद इत्यत्र भेदस्य वास्तवो भेद इति स्वीकारात् । अभेद-स्त्वितरेतराध्यासाच्छब्दार्थप्रत्ययानां भासते इति मञ्जूषायां निरूपितम् । किञ्च "स्वं रूपं" इतिपारभाषणेनार्थविशिष्टस्वरूपबोधनान्नाम्नोऽपि पापदूरीकरणसामर्थ्यम् । शब्देऽर्थवत्त्वं च नाभेदेन अपितु स्वविषयकबोध जनकत्वप्रकारकतात्पर्यविशेष्यत्वसम्बन्धेन । शब्दो ह्यर्थं बोधयन् शाब्देऽपि विषयो भवति तथाच हरिपदमर्थं बोधयत् शाब्देऽपि विषयो भवतीति महालाभः । अत एव तस्य परत्वम् । "स्वं रूपं" इत्यस्य प्रत्याख्यानपक्षे तु शब्दस्य शब्दार्थयोः खण्डशः(१) शक्तिरिति भाष्यकारः । अस्मिन्पक्षे तया उभयोर्बोधादस्माकं परमेष्टसिद्धिः । किञ्च रामनाम्नि इव हरिनाम्न्यपि ॐकारान्तर्भावः । तथाहि । नामपदे अ आम् इति त्रीण्यक्षराणि सन्ति—"अकारो वासुदेवः स्यादाकारश्च पितामहः । मः शिवश्चन्द्रमा वेधाः" । नकारो नादोपलक्षकः सन् बिन्दुस्वरूपः । एतद्बोधनायैव श्रीनारदेन त्रिर्वारं नामपदमेवपदं चोपात्तम् । ॐकारश्च सर्वेषां जीवनम् । सृष्टेर्बिन्दुपूर्वकत्वात । एवं च हरिरेवौङ्कार इति तदर्थः । हरेर्नामेत्यत्र षष्ठ्या अभेदार्थकत्वात् राहोः शिर इतिवदिति त्रिवारोपादानं बोधयति । तस्माद्विनाप्यर्थबोधं नामैव

(१) अर्थौ द्वा शक्तिरेका ।

समस्तपाप्मानं हन्ति इति सर्वमनवद्यम् । अतोऽर्थज्ञानमन्तरापि उच्चारणमात्रेणाजामिलोऽपि संसारार्णवादात्मानमुद्दधारेति प्रसिद्धिः । अलमतिपल्लवेन । हृष तुष्टौ घञन्तः । आनन्दश्च तदर्थः । हर्ष आनन्द इति चानर्थान्तरम् । स च ब्रह्म "आनन्दो ब्रह्मेति व्यजानात्" "आनन्दो ब्रह्मणो रूपं" इत्यादौ तथा दर्शनात् । आशीरर्थकनाथेर्घञ् । ब्रह्मैवेष्टमिति मन्यमानः । अभिधा प्रसिद्धिः ब्रह्मोपासक इतियावत् । भक्त इति क्तिन्नन्तभक्तिशब्दादर्शआद्यजन्तान्नित्ययोगादि लभ्यते । तेन नासौ प्राकृतभक्तः कार्यकाले भक्तवदाचारकः अपितु सर्वदैवेतिफलितम् । मुद्रयामासेत्यत्र "मुद्रा प्रत्ययकारिणी" इति दर्शनाल्लक्षणपरा मुद्रां लक्षणं चकारेत्यर्थः । अङ्कयामासेति यावत् । मुद्रयैव लोकद्वयस्योपकारः । अत एव तस्याः प्रत्ययकारित्वमहिमा । किं बहुना तस्या मोक्षसाधनत्वमपि श्रूयते "मोक्षैकफलं घनं" इत्यादि । कौमुदीशब्दो हि चन्द्रिकारूढोऽपि तस्या अङ्कत्वासम्भवात् तत्सदृशे पर्यवसानम् । अर्थप्रकाशकत्वसाधर्म्यात् । यद्वा कौ इति पृथक् मुदीति पृथक् "मुद हर्षे" इगुपधेतिकः जातित्वान्ङीष् । चन्द्रिकावदियमपि धरायां मोदते अतः कौमुदीपदवाच्या । यद्वा ब्रह्माणं सूर्यं च मोदते अन्तर्भावितण्यर्थः सकर्मकः । ननु निषिद्धकर्मणा दुःखं विहितकर्मणा सुखमित्येव व्यवस्था भवतु किमन्तर्गडुना पुण्यपापेनेति चेत्, शृणु कर्म च त्रिक्षणावस्थायि नश्वरं च कालान्तरभाविसुखदुःखे कथं जनयेत् । तथाच कृतहानिरकृताभ्यागमप्रसङ्गः। स्वीकृते तु तस्मिन् संस्कारात्मना नित्ये आत्मनि विद्यमानाभ्यां ताभ्यां तयोः सिद्धिः । ओङ्कारोपासनायां तु गृहिणोऽनधिकारादसौ भक्तः ओङ्कारान्तर्गते हरिनाम्नि श्रद्धालुः सन् हरिनामैव भजते यतः सुधीः अतः सर्वं जानातीति गूढाशयः । नित्यकूटस्थब्रह्मोपासनां तु सुधीरेव जानाति । तद्विषयिणी चिन्तैव तदुपासनम् न तु नमस्कारादि । अत एव सन्धिप्रकरणादौ

सुध्युपास्यत्वेन ब्रह्मनिर्देशः । तत्फलं तु मङ्गलम् "अशुभानि निराचष्टे तनोति शुभसन्ततिम् । स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम्" इत्युक्तेः । ओङ्कारवर्णनपि मङ्गलार्थमेव । तदुक्तम्–"ओङ्कारश्चाथ-शब्दश्च द्वावेतौ ब्रह्मणः पुरा ॥ कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकाविमौ" इति श्रुतिः । निर्विघ्नेन ग्रन्थसमाप्तिकामोऽहमपि ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च स्मारं स्मारं तद्वर्णनमकार्षम् ।

अत्र मीमांसा जरीगरीति । शब्दात्मनो हरिनाम्नः क्षणिकत्वेन कथं कालान्तरभाविसुखसाधनत्वम् । काणादवैशेषिकाः शब्दानामनित्यत्वमित्याभिमन्यन्ते "तस्मादनित्या एवैते वर्णाः सर्वे मतं हि नः" इति तेषामुक्तिरिति न वाच्यम् । यज्ञादिवत्पुण्याख्यसंस्कारोत्पादनेन तत्साधनत्वमिति बिभावनीयम् । ननु यज्ञादिसाजात्ये कस्मात्परत्वमिति चेत् , अत्र ब्रूमः । हरिपदस्य क्षणिकत्वेऽपि संस्कारमनुत्पाद्यैव कालान्तरभाविमोक्षसाधनत्वम् । तदुच्चारणमात्रेणानन्तकोटिभूतभाविजन्मकल्मषनिराकरणात् । अग्निजन्यदाहवत् । न ह्यग्निर्दाहं जनयन् द्वारं प्रतीक्षते कुठारवत् अपि तु साक्षादेव स्वयं दहति । तद्बोधनायैव श्रीदेवर्षिनारदेन त्रिर्वारं नामैवेति दर्शितम् । एवं "हरिस्मृतिः सर्वविपद्विमोक्षणं" इत्यादौ सर्वपदोपादानम् । हरिस्मृतिपदेनार्थपदस्मृत्योः सङ्ग्रहः । अत एव "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इत्यादि सङ्गच्छते । शब्दार्थयोरभेदप्रतीतेरनुभवसिद्धत्वात् । अत एव "शब्दार्थप्रत्ययानामितरेतराध्यासात्तत्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं" इति पातञ्जलसूत्रं सङ्गच्छते । शब्दार्थयोस्तादात्म्यं चारोपसिद्धमेव । अत एव वह्निशब्दोच्चारणे मुखे दाहापत्तिरूपापत्तिर्दूरापास्ता । इदमेव भेदसहिष्णुरभेद इत्यादिना गीयते । परे तु तयोर्वास्तविकमेव तादात्म्यम् । वह्न्यादिशब्दोच्चारणे मुखे दाहाद्यापत्तिस्तु न । कारणतावच्छेदकीभूतसंयोगसम्बन्धेन तत्र वह्नेरभावात् ।

तार्किकमते कालिकेन सम्बन्धेन मुखे वह्न्यादिसत्त्वेऽपि दाहाजननवत् । नचैवं शब्दस्येवार्थस्यापि श्रावणप्रत्यक्षापत्तिः शब्दस्यापि चाक्षुत्वापत्ति-रिति वाच्यम् । धर्मिण ऐक्येऽपि पदत्ववह्नित्वयोर्भिन्नधर्मयोस्तत्र सत्त्वेन श्रवणसन्निकर्षस्य पदत्वेन ज्ञानं प्रत्येव कारणत्वेन चक्षुःसंयोगस्य वह्नि-त्वेन ज्ञानं प्रति तत्त्वेन चैतदापत्तेः शशशृङ्गायमाणत्वादिति सिद्धान्तवेदि-नः प्राहुः । एतेन यथा हरिपदवाच्यस्य स्मरणात्सर्वविपन्नाशस्तथा हरि पदस्मरणादपि । एतेन शब्दान्तराद्धर्यादिपदस्य व्यतिरेको व्यज्यते । नहि वह्न्यादिपदस्योच्चारणेन स्मरणमात्रेण वा दाहाद्युत्पत्तिः । हरिपदं विना-प्यर्थज्ञानं संसारसागरात्तारयति यथाजामिलमुच्चारणमात्रेण तारयामास । तेन एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वनियमोऽप्यत्र नास्ति अन्यत-रमात्रेण विघ्ननाशसम्भवादिति विभावनीयम् । किञ्च अर्थादपि नामैव बल वत् । यतः सेतुबन्धने रामेणैव क्षिप्ताः पाषाणा निममज्जुस्ततश्चकितमना दाशरथिः स्वनाम लिखित्वा तान्विससर्ज ततो न निममज्जुरितिस्पष्ट मेव । प्रकृतमनुसरामः । अभिधानमभिधा "आतश्चोपसर्गे" इत्यङ् । अङ न्तं स्त्रियाम् । हर्षनाथः अभिधा नाम यस्येति बहुव्रीहौ ह्रस्वः । "आख्या-ह्वे अभिधानं च" इत्यमरः । स्फायीत्यादिना मुदे रकि मुद्रा अन्तर्भावि-तण्यर्थः । तथाच मोदयति हर्षयतीति मुद्रापदार्थः । मुद्रां लब्ध्वै-व सर्वे मोदन्ते । किं बहुना एकहायनोऽपि बालस्तां लब्ध्वा मोदते इति सर्वैर्ज्ञातमेव । सा हि प्रत्ययकारिणीत्युच्यते ।अयं भावः । प्रत्य-यश्च प्रामाण्यम् । विना तया पण्डितस्यापि न प्रामाण्यम् । अतस्तेऽपि सर्वे वनवृद्धस्य द्वारि तिष्ठन्ति किङ्करा इति लोकप्रवादः । किञ्च प्रतिपूर्वक इण् ज्ञानार्थकोऽपि मुद्रयैव ज्ञानिनं तर्पयन् ज्ञानी भवति । प्रत्ययपदं सुप्तिङ्वाचकम् । मुद्रयैव पण्डितं तोषयन् व्याकरणं पठन् प्रत्ययं जानाति । किं बहुना भक्तोऽपि मुद्रया भवति । विना मुद्रां पुष्पपत्रादिकमपि कथं निवेदयेत् । अत एव "पत्रं पुष्पं फलं तोयं

यो मे भक्त्या प्रयच्छति" इत्युक्तम्। भक्तिं प्रयच्छतीत्येव नोक्तम् । किञ्च मुद्रयैव हेतुना मुक्तो भवति "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इत्यादिना तथोक्तत्वात् । यद्वा अमुद्रया भक्तो भवति "निष्कि-ञ्चना वयं शश्वत्"इत्यादिना रुक्मिणीं प्रति श्रीभगवतैव तथोक्तत्वात् । पुनश्चात्र मीमांसा अवतिष्ठते। हरिनाम परो धर्मः हिंसासाङ्कर्याभावात्सा-क्षान्मोक्षसाधनं धर्मः । यज्ञादिधर्मोऽपि चित्तशुद्धिद्वारा मोक्षसाधनम् । स तु विलम्बेनैव हिंसादिसाङ्कर्याच्च दुःखसाधनमपि अतः प्रायश्चित्तम पेक्षते । अकृते तु तस्मिन् (१)स्वर्गसुखमहाह्रदावगाहिनोऽपि दुःख-वन्हिकणिकां सहन्ते । अत एव हरिनाम्नः परः भिन्न इत्यर्थः । हरि-नामपरो भक्तस्तु यज्ञादिधर्मो नैतादृश इति जानाति । अतो "ज्ञानी त्वात्मैव मे मतं" इत्यत्रैवशब्दोपादानम्। यज्ञी तु नोक्तम् । एवमहिंसा परमो धर्म इत्यत्र न हिंसा यत्र विद्यते स एव परमो धर्म इत्याशयः । यज्ञादिधर्मस्यापि धर्मत्वमेव परन्तु हिंसादिसाङ्कर्यान्न परत्वमित्यभि-प्रायः । यद्यपि पञ्चमकारोपासकानां तन्त्रमार्गपराणामपि मोक्षत्वमुक्त-मेव तथापि तदध्वा अरण्यानीव गन्तुमशक्यो विघ्नबाहुल्यात् । किञ्च यज्ञीयहिंसापि न विधितात्पर्यविषया विधेः परिसङ्ख्यापरत्वात् । हिंसा-निवृत्तिरेव तत्तात्पर्यविषया । किञ्चाधिकारिविशेषं च नापेक्षते । "स्त्रियो वैश्यास्तथा शूद्रा" इत्यादिना भक्तिमार्गे सर्वेषामधिकार एवेति प्रद-र्शितम् । कालनियमोऽपि नास्तीति प्रदर्शितम् "प्रयाणकालेऽपि च" इत्यादिना "जन्मलाभः परः पुंसां" इत्यादिना च। तस्मात्सर्वकर्मापेक्षया हरिनामोच्चारणं सुखलभ्यं सन्मोक्षसाधनमिति भगवत्तात्पर्यम् । एतद-भिप्रायेण "मा हिंस्यात्सर्वा भूतानि" इतिश्रुतिरुत्तिष्ठति । अस्याश्च सामान्यश्रुतेः "अग्नीषोमीयं पशुमालभेत" इत्यनेन विशेषवाक्येन न

---

(१) दुःखावच्छेदकीभूतशरीरावृत्तिजातिमच्छरीरावच्छिन्नसुख-त्वं स्वर्गत्वम् ।

सङ्कोचः । उभयोर्विरोधाभावात । विरोधे हि बलीयसा दुर्बलं बाध्ये तेत्यादिग्रन्थेन साङ्ख्यतत्त्वकौमुदी स्पष्टमेव वक्ति । किं बहुना । कर्ममार्गस्य परत्वं प्रतिपादयन्नपि जैमिनिर्विधिवाक्यस्य परिसङ्ख्यापरत्वं निजगाद । एतदभिप्रायेण मातरं प्रति श्रीरामोक्तिः । "मार्गास्त्रयो मया प्रोक्ता" इत्यादिना "कर्मयोगेन शस्तेन वर्जितेन विहिंसनं" इत्यनेन हिंसाया अप्राशस्त्यमेव दर्शितम् । किञ्च कर्ममार्गस्य दुष्करत्वप्रदर्शनाय दानशीलस्य नृगस्याधोगतित्वं प्रदर्शयामास । विद्याकर्मणोर्विरोधात्समुच्चयोऽपि निराकृत एवेति सर्वैर्विदित एव । "कर्मणैव हि संसिद्धिमास्थिता जनकादय" इत्यत्र एव अप्यर्थः । "त्रिविधा भवति श्रद्धा कर्मणां सा स्वभावजा" इत्यादिना सत्त्वप्रधानीभूतकर्मपरत्वाभिधानात । तच्च हिंसावर्जितमेव । अन्यथा समुच्चयवादस्य खण्डनमेव न स्यात् ! प्रमादरहितस्याध्ययनादिकर्मणो दानस्य च दुष्करत्वम् । का हिंसाप्रधानीभूतस्य यज्ञादेः कथा । अत एव भट्टोजिदीक्षिताः "धर्मात्प्रमाद्यति" इत्युक्तवन्तः । न तु ज्ञानात्प्रमाद्यतीति । आलङ्कारिका अपि "यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्किता" इतिनिदर्शनोदाहरणेन दानकर्तुरपि सौम्यताऽभावत्वं प्रदर्शयन्ति । तस्माद्भक्तिमार्ग एव प्रशस्यः । न तन्मार्गारूढः कदापि प्रणश्यति । अत एव सर्वाध्वानं प्रदर्श्य भक्तिमार्गस्यैव मुख्यत्वं मन्यमानः अन्ते "न मे भक्तः प्रणश्यति" इत्येव सारमिति निजगाद कर्ममार्गस्य च्युतिं मत्वा "चतुर्भिश्च" इत्यादि पठन्ति । वेदोऽप्येतं बुद्ध्वा पूर्वं कर्मकाण्डमुक्त्वा अन्ते "ईशावास्यं" इत्यादिना निवृत्तिपरत्वमेव मुख्यं प्रतिपादयति । निखिलशास्त्राणि निवृत्तिपराण्येव । ये तु याज्ञिकास्ते तु विवादं कुर्वीरन् ये तु ज्ञानिनस्ते तु हिंसां त्यजन्त्येव । लोकानां भिन्नरुचित्वात् । यथारुचि लोकः करोतु न तन्मुखपिधाने वयं समर्थाः । किञ्च "अग्नीषोमीयं पशुमालभेत" इति

विधिमार्गपरा ये दीक्षितपदप्राप्तये यतमानास्ते तु काश्यामपि परम-कष्टेन श्रीभैरवयातनां भुञ्जाना मुक्ता भवेयुः । नहि कर्मपराणामियं गतिः काशी । अतो बलिर्नैवात्रागत इति प्रबन्धः श्रूयते तस्मात्पशुघा-तिनो झटिति काश्यामपि मुक्ता नैव भविष्यन्ति इति मन्ये । यद्यपि भक्तिमार्गोऽपि दुष्कर एव तथापि तत्र विघ्नप्राचुर्याभावेन सुकर इव विभाति "न मे भक्तः प्रणश्यति" "शुचिर्वाप्यशुचिर्वापि" "स्त्रियो वैश्यास्तथा शूद्रा" इत्यादिना तस्य सुकरत्वप्रदर्शनात् । अत एव मदालसापत्यानि मातुरुपदेशमात्रादेव मुक्ता बभूवुरिति श्रूयते । यथा-ऽऽपणिकाः पूर्वं क्रेतुमनर्हमपि क्रय्यं प्रदर्शयन्तः पश्चाद्विविच्यापणा-न्तर्गतमानीय प्रदर्शयन्ति । एवमेव वेदा अपि पूर्वं कर्मकाण्डं गहनं प्रदर्शयन्तः पश्चाज्ज्ञानकाण्डं सर्वोपकारकं दर्शयन्ति । वेदाः कर्मणि सर्वान्पूर्वं क्लेशयन्तः पश्चात्तदुपरि कृपालवो गोप्यं ज्ञानकाण्डं दर्शयन्ति अत एव "गहना कर्मणो गतिः" इत्युक्तम् । अतः पूर्वे राजर्षयोऽपि कर्मपरास्तस्य गहनत्वं मन्यमाना ज्ञानमार्गमवलम्ब्यैव त्यक्तराज्यश्रि-योऽरण्यमगच्छन् । किम्बहुना कौशल्यादेवकीप्रभृतयोऽपि कर्म त्य-क्त्वा ज्ञानपरा एवाभवन् । अत एव कर्मणो दुष्करत्वं दर्शयन् युधि-ष्ठिरयज्ञान्ते श्रीकृष्ण एव मूषको भूत्वा युधिष्ठिरवैराग्यं जनयामास । एतावता भक्तिमार्ग एव श्रेयानित्युक्तम् । अलमधिकेन । यद्वा मुद्रया आं ब्रह्माणम् आस चिक्षेप असुक्षेपणे लिट् । मधुनामा कर्णमलजो दानवः सम्पदुत्कर्षात् प्रदीप्तः सन् ब्रह्माणं हन्तुमुद्युक्तो बभूवेति सप्त-शती, स त्वभक्तः । भक्तस्तु अ इतिच्छेदः । मुद्रावानपि न निष्किञ्च-नमपि क्षिपति तदुपरि कृपामेव कुरुते । "आकारश्च पितामह" इति-कोशः । यद्वा कौमुदीं चन्द्रिकाम् आं ब्रह्माणम् आस । यद्वा कौ पृथिव्यां ब्रह्माणं चिक्षेप मुदीं मुदं च चिक्षेप । ब्रह्माणमसौ हनिष्यतीति मन्यमा-नो लोको न जहर्ष । यद्यपि कल्पादौ किमपि नास्ति तथापि भावि-

सृष्टिमादायैवोक्तम् । वासुदेवो जनितेत्याशया देवा अवतेरुः इतिवत् सूत्रशाटिन्यायेन पटं वयेतिवत् शास्त्रेऽपि भाविसंज्ञामादायापि कार्यं निर्वहन्ति सम्प्रसारणवत् । यद्वा मुद्रया आं आ स इति च्छेदः । आः मित्यङ्गीकारे आ अभिविधौ । तथाच मुद्रया आ सर्वं सम्पद्येत आं स्वीकुर्मः । स भक्तः कौमुदीं मुद्रयामासेति भङ्गश्लेषः । नाना अनेके शताधिका द्विचत्वारिंशदर्था वाच्याः । यद्वा अर्थ्यन्ते इति अर्था अणिमादयः तेषां प्रतिपादनीं ज्ञापिका गत्यर्थपदेर्ज्ञानार्थत्वात् । अणिमाद्यैश्वर्यमपि इयं दापयतीत्यर्थो वा "करणाधिकरणयोः । "कृत्यल्युटो बहुलं" इति कर्तरि लुटि टित्वात् ङीप् । अहो मुद्रामाहात्म्यं भुवनेश्वर्यपि हस्ते मुद्रामेव धत्ते । अतो वरदाङ्कुशपाशाभीतिकरामिति तद्ध्यानम् । किम्बहुना श्रीवासुदेवोऽपि मुद्रां प्रदर्शयन् संसाररोगनिवृत्तये कटु ज्ञानौषधं पाययन् बालकमिवार्जुनमुद्दधार । यद्वा कुर्वन्नित्यत्र कुरु अन्नित च्छेदः । हे अन् इति सम्बोधनम् । अनिति जीवयतीत्यन् अनप्राणने विजन्तः "नङि सम्बुद्ध्योः" इति नलोपाभावः, हे सफलजीवन ! वयन्तु जीवन्तोऽपि निष्फलजीवना यतो नो वयं भक्ता नापि मुद्रणसमर्था इति सम्बोधनार्थः । अतस्त्वमेव स्वस्वस्य सफलं कुरु स प्रसिद्धस्त्वं वा । अहो आश्चर्यम् अज्ञानम् । "आश्चर्यवत्पश्यति कश्चिदेनम्" इत्यादिवत् । अस्य क्षिप दूरीकुरु इति यावत् । अत एव स्वस्वस्य सुभाग्यता । ज्ञानिनो ज्ञानिधनस्य ज्ञानस्यैव सुभाग्यत्वं न तु संसारिणामिति भावः । यद्वा असि असुभाग् यता इतिच्छेदः । अस भुवीत्यस्य मध्यमपुरुषैकवचनान्तस्य असीतिरूपम् । असुभागिति "भजो ण्विः" यता इति शत्रन्तेणधातोस्तृतीयान्तैकवचनान्तम् । गत्यर्थस्य ज्ञानार्थत्वेन ज्ञानेन हेतुना त्वमसुभाग् असि इत्यर्थः।सफलजीवनोऽसि अज्ञानिजीवनं त्वजीवनमेव । अतः "अजीवनिस्ते शठ भूयात" इति दीक्षितोक्तिः । यद्वा न विद्यते सुभाग् यस्मादिति बहुव्रीहिः। ज्ञानी एव सर्वोत्क-

षेण वर्तते । यद्वा अस्यसुभाग्यतेत्येकं पदम् । असिः खड्गः असवः प्राणा भाग्यम् एतेषां भावस्तत्ता अहो आश्चर्यम् । एतत्सर्वं महाभाग्येनैव सम्पद्यते। अयं भावः । खड्गेन विना किंचिदपि कार्यं न सम्पद्यते अतो योगमायाध्याने "खड्गं पाश" इत्यादिना तस्य प्राधान्यं दर्शितम् । सम्राड्भटा अपि कुक्षौ तमेव बध्नन्ति । एवमसवश्च आश्चर्यम् । कुत आगच्छन्ति कुत्र गच्छन्ति यैस्त्यज्यमानः शवो भवति । भाग्यमपि आश्चर्यमेव यद्वशाद्धनी अपि दरिद्रो भवति महानपि नीचैस्त्वमाप्नोति एतदतीव बलवत् । अत एव पृथया वधूं प्रति "भाग्यवन्तं प्रसूयेथा मा शूरं मा च पण्डितम् । शूराश्च कृतविद्याश्च वने सीदन्ति मामकाः" इत्युक्तम् । यद्वा असीतिर्दीर्घान्तोऽस्तु । असीनामा गङ्गा तदर्थः। इयमपि आश्चर्यमेव यतः "असीवरुणयोर्मध्ये" इत्यादिना तस्या मोक्षसाधनत्वं प्रसिद्धम् । नह्यस्यां सदा प्रवाहो गङ्गाया इव दृश्यते । शुष्कजलैव दृश्यते तथापि तस्या महामहिमा । एतदप्याश्चर्यमेव । यद्वा असि अ सुभाग् यता इतिच्छेदः । हेअ वासुदेव यता ज्ञानवता भक्तेन त्वं सुभाग् असि । अस्यापि भक्तस्य सुभाग्यता । भङ्गश्लेषः । अयं भावः । ज्ञानिनं भक्तं विना कस्तव महिमानं जानीयात् भवतो भाग्यमेव न स्यात् भवद्भजनेनैव भक्तस्यापि सुभाग्यता "ये यथा मां प्रपद्यन्ते" "ज्ञानी त्वात्मैव मे मतम्" इत्यादिना परस्परप्रेमैव वर्णितः । यद्वा अ स्य सुभाग् यता इतिच्छेदः स्येति षोऽन्तकर्मणि लोण्मध्यमपुरुषैकवचनान्तः । हेअ ! वासुदेव ! यता एति परलोकं गच्छतीति यन् तेन नश्वरेणेतियावत् । देहेन सुभाग् भवतीति काकुः अपि तु न । अतो रोगिणं मां स्य जहि भवद्भजनप्रतिकूलं देहिनं मां वृथा किमर्थं जीवयसीति निर्विण्णस्योमानाथस्येश्वरं प्रति परिदेवनम् । स्येति सकर्मकं क्रियापदं दृश्यते यथा "राघव ! स्य शितैर्बाणैः शत्रुं रावणमाहवे" इत्यत्र । यद्वा अस्येतिवासुदेववाचकादशब्दात्षष्ठी अस्य वासुदेवस्य यता ज्ञानवता भक्तेन कृत्वा सुभाग्यता असावपि

सुभाक् सम्पन्नः । अयं भावः भक्तमन्तरा मुद्राव्ययं कृत्वा कः प्राकृतः भवन्नाम्नः अनेकार्थप्रतिपादनीं कौमुदीं मुद्रयेत् । भक्तेनैव भवतो भाग्यम् असौ कौमुदीमुद्रणपरमधर्मबलादेवासारसंसारपारङ्गामीति भक्तस्य महाभाग्यमिति भावः । हरिनाम्नो महान् महिमा यत आबालं तदर्थं जानन्ति अतो मुहुर्मुहुर्ब्रुवन्ति च एतत्पदं पापनाशकमिति तेषामपि विश्वासः । तेषां त्वर्थान्तरज्ञानाभावान्न प्रतिबध्यप्रतिबन्धकभावकल्पना अत एवाबालं हरिभक्तिरिति प्रसिद्धिः । बालशब्दो हि अज्ञपरः । अतः पद्मानि तारामण्डलाख्यानि पुष्पाणि च हरिसूर्यमुपासयन्ति हरिशब्दवाच्यत्वात् । हरिशब्दवाच्यस्यापि भेकस्यायोग्यत्वान्न तस्योपासनम् । अत्र केचित् हरिपदमनेकार्थवाचकमिति ये जानन्ति तैरत्र हरिपदं विष्णुविषयकबोधतात्पर्येणोच्चरितं सद्भेकादिविषयकबोधं प्रति प्रतिबन्धकमिति प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः परधर्मपदोपादानात् । नहि भेकादितात्पर्येणोच्चारितस्य तत्त्वम् अन्यथा एकसंबन्धिज्ञानस्यापरसंबन्धिस्मारकत्वेनाश्वाद्युपस्थितौ अश्वारूढो हरिरिति बोधोऽपि स्यात्। एवंस्थिते जातिव्यक्त्यन्यतरस्यापि पदार्थत्वाज्जातिविषयकबोधतात्पर्यज्ञानस्य व्यक्तिबोधप्रतिबन्धकत्वेन उभयोर्बोधो न स्यात् इतिचेत; अत्र ब्रूमः । एकार्थविषयकबोधतात्पर्यज्ञानमपरार्थविषयकबोधं प्रति प्रतिबन्धकमिति प्रतिबध्यप्रतिबन्धकभावे अर्थश्च पदजन्योपस्थितीयमुख्यविशेष्यताश्रय एव । एवं चान्यतरस्य पदार्थैकदेशत्वेन नोक्तदोषः । एवमपि घट एव भूतल इत्यादावव्याप्तिः । एवशब्दार्थो हि अन्ययोगव्यवच्छेदः । अन्यसम्बन्धाभावश्चाप्रसिद्धः इति चेत् , अत्र ब्रूमः । एवशब्दस्योभावर्थौ एका शक्तिः । इयमेव खण्डशः शक्तिरिति गीयते । खण्डशः शक्तिस्थले एकस्य प्रसिद्धिरपेक्षिता । प्रकृते अन्यसम्बन्धस्यापि प्रसिद्धिः अभावस्यापि । नन्वेमपि घटान्यसम्बन्धाभावो भूतलवृत्तिरिति बोधो न स्यात । अन्यसम्बन्धार्थविषयकज्ञानस्याभावविषयकबोधं प्रति प्रतिबन्धकत्वादितिचेत् , एकशक्तिनि

रूपकार्थविषयकबोधतात्पर्यज्ञानमपरशक्तिनिरूपकार्थविषयकबोधं प्रति प्रतिबन्धकमिति गृहाण। प्रकृते च एकस्या एव शक्तेः सत्त्वेन न प्रतिबन्धकत्वम्। एतन्मूलकमेव 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति हरिपदस्य तदर्थे सम्बन्धश्च शक्त्याख्यः। शक्तिश्च अस्मात्पदादयमर्थो बोद्धव्य इत्याकारिका भगवदिच्छा। तत्र पञ्चम्यर्थो जन्यता बुधधात्वर्थः शाब्दबोधः तव्यप्रत्ययार्थो विषयता। पदस्य च निरूपितत्वसम्बन्धेन पञ्चम्यर्थजन्यत्वेऽन्वयः तस्य चाश्रयत्वसम्बन्धेन बुधधात्वर्थबोधेऽन्वयः बोधस्य निरूपितत्वसम्बधेन तव्यप्रत्ययार्थविषयतायामन्वयः विषताया आश्रयत्वसम्बधेन घटपदार्थेऽन्वयः। एवं च हरिपदजन्यबोधविषयत्वनिष्ठाश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितेश्वरीयेच्छीयविशेष्यता हरौ हरिपदस्य शक्तिः। तथा च निरूपितत्वसम्बन्धावच्छिन्नविशेष्यतासमानाधिकरणाश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितबोधत्वावच्छिन्नविशेष्यतासमानाधिकरणनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविषयत्वत्वावच्छिन्नविशेष्यतासमानाधिकरणाश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयाविशेष्यताश्रयो हरिरित्याकारकज्ञानं हरिपदशक्तिज्ञानमित्युच्यते। विषयतादीनां स्वरूपनिरूपणे तु विस्तरभयादुपेक्ष्यते। एवं चैतादृशज्ञानमन्तरेणैवोच्चारणमात्रेण सर्वविपन्मोक्षणमिति भावः। एतमर्थमभिप्रेत्यैव 'अजामिलोऽप्यगाद्धाम' इत्यत्र अपिशब्दः। अयं भावः। अजया मिलतीत्यजामिलः मिलसङ्गमे "इगुपध" इति कः। वाराङ्गनाभिरपि कामापूर्त्याऽजया साकमपि मैथुनं करोतीत्यर्थपरः। एतादृशो मूर्खोऽपि संसारं विहाय हरेर्धामागमदित्यर्थः। हरिपदस्य साधुत्वमपि नापेक्ष्यते प्रातिपदिकमात्रोच्चारणमपि साधुपुण्यजनकमिति गूढाशयः। यद्वा हेअसि! गङ्गे! असुभाग्यता प्राणानां भाग्यता। अयं भावः। जीवन् सन् तव दर्शनमवाप्तवानस्मि त्वयि प्राणत्यागेऽपि असूनां सुभाग्यतैवेति उभयपक्षे सुभाग्यता। अत्र उभयोर्हस्तयोर्लड्डुकमिति लोकप्रवादः।

यद्वा अस्यामसवः अस्यसवः तेषां भाग्यम् अस्यसुभाग्यं तस्य-भावस्तत्ता अहो कलिकाले जीवनमेव दुःखतरं, जीवनं माभूत् त्वयि प्राणा गच्छेयुः अतः प्राणानां भाग्यता एतदाश्चर्यमिति । यद्वा अस्यामसवो येषामिति बहुव्रीहिरस्तु असी च असवश्च भाग्यं चेति द्वन्द्वमेवोचितं लाघवात्। अतो "द्वन्द्वः सामासासिकस्य च" इति भगवदुक्तिः । अत्रायं विचारः। विनैव विभक्तिं हर्यादिपदानि साधूनि पुण्यजनकानि। अत्रैतिह्यम्। भट्टोजिदीक्षितानां प्राणोत्क्रान्तिसमये प्राचीना दयालवो गुरवस्तानुद्धर्तुकामास्तद्गृहान् जग्मुः तेषां दुःखं पश्यन्तस्तन्नाशाय राम् उच्चारयेति शिक्षयामासुः विना प्रत्ययमसाधुभ्यः कथं पुण्यप्राप्तिरिति भट्टोजिदीक्षितैरुक्तम् । एतावत्कालपर्यन्तमप्य-स्मन्मतखण्डनमेव चकार अस्मिन्समयेऽपि खण्डनमेव करोति इति क्रुद्धाः सन्तः पिशाचः स्या इति शेपुः। तथा च रामादिशब्दा विभ-क्तिमगृह्णन्तोऽपि साधव एवेति सारम् । अत एव काश्यां गतासुनयने ऽपि काशीमरणादपि रामनामैव मोक्षसाधनम् इति बोधयन्तः पिनाकि-मानभङ्गार्थमेव कोलाहलेनोच्चैस्तरां नदन्तो नयन्ति शवं श्मशाने। अतो "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इत्युक्तम्। किम्बहुना शुकसा-रिकादीनपि तदेव पाठयन्ति। किंच द्वादशेऽह्नि पिता नाम कुर्यादित्य त्रापि प्रातिपदिकपरमेव नामपदम् । एतावता सविभक्तिकं निर्विभक्तिकं-वा हरिनाम सर्वविपन्मोक्षणमिति पर्यवसितम् ।

अस्य च पुस्तकस्य संस्कारविषये यावान्प्रयत्नः समपेक्षितस्ता-वान्प्रयत्नो मयाऽकारि तथापि प्रमादान्मुद्रणादिदोषाद्वा स्खलितेषु गुणैकपक्षपातिनो विपश्चितः क्षमिष्यन्त इत्यशास्ते—

विद्वद्वशंवदः

उमानाथशर्मा :

श्रीगणेशाय नमः ॥

अथ वामनस्तोत्रम् ।

अदितिरनिशमेवं प्रार्थयन्ती पुमांसं
दितिजवनदवाग्निज्वालमालाकुला सा ॥
तव दितिजकुपुत्रैर्नाशिता मे सुपुत्रा
ऋषिवर ! भगवन् ! भो आर्यपुत्राङ्ग ! शश्वत् ॥ १ ॥
दितितनुजकुपुत्रं घातुकं त्वं सुपुत्रं
भवभयहरणे मे पेशलं देहि मान्य ! ॥
इति वचननिबद्धः प्राह साङ्गव्रतं तत्
मुनिरपि नितरां हा स्त्रैण इत्थं किमन्ये ॥ २ ॥
अगमददितिगर्भं वामनो देवदेव-
स्तत ऋषिसुरवारां स्वच्छताऽभूद्विश्च ॥
अजनिरपि च जज्ञे वामनं नाम चक्रु-
रुपनयनमपीत्थं देवसङ्घा मिलित्वा ॥ ३ ॥
वटुमपि भगवान्स व्याजमूर्त्तिं गृहीत्वा
बलिमखमुपयातो हर्षयन्देवसङ्घान् ॥
मुमुहुरति तदा ते वामनं दिव्यरूपं
सकलजनमनोज्ञं दृष्टवन्तः सहर्षाः ॥ ४ ॥
बलिरपि बटुवेषं पूजयामास सम्यक्
त्रिपदपरिमितां गां दत्तवान्वामनाय ॥
हरिरपि चरणाभ्यां पूरयामास सर्वं
जगदतिविमलं तद्विश्वरूपं गृहीत्वा ॥ ५ ॥

---

(१) चो हेतौ। खर्वत्वाद्धेतोरित्यर्थः।

स्वशिरसि पदमेकं स्थापयित्वा सुरारि-
र्भुवनमधरमित्थं पुण्यवाँस्तज्जगाम ॥
प्रतिदिनमसकृत्तं द्वारपालं ददर्शा-
(१)च्युतपदमसकृत्को मापि नैवं ददर्श ॥ ६ ॥
जननमरणरूपं सर्वदुःखं विहाया-
च्युतपदमगमिष्यत्पाठकर्त्ता महेच्छः ॥
हरिरितिपदमेकं हन्ति पापं समस्तं
नहि हि कलियुगेऽन्यो हेतुरस्मात्सुलभ्यः ॥ ७ ॥
गोब्राह्मणहितार्थाय यस्य जन्म पुनः पुनः ।
स एव कविचक्षुर्हि स्फोटयामास कार्यतः ॥ ८ ॥
अहो हरिगतिश्चित्रा बलिनिग्रहणोद्यतः ।
वामनोऽभूत्स्वयं तस्य द्वारपालो बभूव च ॥ ९ ॥
नमामि ते वामन ! पादपङ्कजं
स्मरामि ते नाम मलापहं विभो ! ॥
तव प्रसादाद्भविता कदा हरे !
वटो ! दयालो ! मम तापखण्डनम् ॥ १० ॥
बलिबलमथने पटुर्वटुस्त्वं
जहि मम वैरिबलं द्रुतं दयालो ! ॥
नरकपतनहेतवश्च्युयस्ते
बलिबलिनो रिपवस्त्रिविक्रमोऽसि ॥ ११ ॥
जाग्रत्स्वप्नसुषुप्तिसाक्षिकतया वा कथ्यसे त्वं तथा
विष्णोर्व्यापकतास्ति वा खलु हरे ! साक्षी यतः कथ्यसे॥
सत्त्वं राजसतामसं शमयसि त्वं कथ्यसे ज्ञानिभि-

---

(१) कः ब्रह्मा, मापि लक्ष्मीरपि ।

(१)ब्रह्माविष्णुमहेश्वरान्नियमयंस्त्रीन्वर्ण्यसे वा बुधैः॥१२॥
स्वर्गादित्रितयं पदैस्त्रिभिरिति व्याप्तोऽसि वा वर्ण्यसे ।
भूमंस्त्वां नितरां न कोऽपि भगवन्वेत्तीति किं मादृशः॥
विष्णो ! वामन ! पद्मनाभ ! भगवन् ! गोविन्द ! शौरे!स्वभू·
रित्युच्चार्य विचार्य जन्ममरणक्लेशं न हास्यामि किम् ॥१३॥
विभ्रत्तनुं निखिलमञ्जुलसन्निवेशां
पालाशदण्डमृगचर्मकमण्डलूँश्च ॥
सन्दर्शयन् बलिमगात्कपटं चिकीर्षु-
र्भूमापि कार्यवशतो बत खर्वरूपः ॥ १४ ॥
कर्माणि तस्य बलियज्ञगतस्य विष्णोः
स्मृत्वाऽमलानि कलिकालकदुष्कृतानि ॥
दूरीकृतानि नितरां विबुधप्रसादा-
च्छश्वत्प्रसन्नमनसो मयि सन्तु मान्याः ॥ १५ ॥
यो व्याजवामनवपुर्बलिमध्वरेऽगा-
दस्मद्धृदि स्फुरतु सोऽञ्जनपुञ्जमञ्जुः ॥
पायात्सदाऽदितिज एव भवाब्धिपोतः
सच्चित्सुखैकनिलयः परिपूर्णरूपः ॥ १६ ॥

इति श्रीमदुमानाथपण्डितविरचितं सङ्क्षिप्तवामनस्तोत्रं सम्पूर्णम् ।

---

(१) अत्र देवता द्वन्द्वे चेत्यानङ् बोध्यः ।

श्रीगणेशाय नमः ।

अथ
वामननामकौमुदी ।

कतिकतिजनिभिर्न यस्य पादम्
विविदुरहो गणपस्य योगिनस्ते ॥
मम स दुरितनाशमत्र कुर्या-
द्विशतु मतिं च सदा शिवस्य सूनुः ॥

(१)वामनो बटुरितिपद्यस्थवामनःपदार्थो यथामति लक्ष्यते । अभावविशिष्टभाववाचको वाशब्दो "नवेति" सूत्रे प्रसिद्ध एव "विकल्पे वा" इत्यमरः । तथाच मनो=मानसं वा=विकल्पात्मकम् । कदाचिदित्थं करोमीति सङ्कल्पयति कदाचित् तमपि निषेधति । अतः सङ्कल्पविकल्पात्मकं मन इति तल्लक्षणम् । तदुक्तम्—"तत्कर्मसङ्कल्पविकल्पकं मनः"। "चञ्चलं हि मनः कृष्ण" इति । "असंशयं महाबाहो" इत्याद्युक्तमनोदुर्निग्रहत्वस्पष्टप्रतिपत्तये भूम्ना श्रीभगवतोच्चैस्त्वं विहाय नीचैस्त्वं खर्वस्वरूपत्वं हास्यास्पदं गृहीतम् । मनो हि हास्यास्पदं भवति यतः सङ्कल्पितमपि त्यजति । त्रिपात्परिमितां वसुधां बलिं याचित्वा त्रिभुवनमेवाक्रान्तयामास । ततो बलेर्भक्तिभावं विचार्य स्वमेवार्पयामास । एतच्च सर्वं मनोलक्षणम् । असौ वामनःपदार्थः । एकं वामनःपदं समाख्या तन्निर्वचनं च लक्षणम् । सकृदुच्चरितमपि वामनःपदं द्विधाऽऽव-

---

(१) कुत्रचिद्वाक्येषु पदच्छेदस्य गहनत्वात्स्पष्टप्रतिपत्तये सन्धिमन्तरेण पदच्छेदो दर्शितः ।

र्त्तनीयम् । तत्रैकं लक्षणपरं प्रमाणपदवत्(१) ।

ब्रह्मेशविष्णुसुरदानवसिद्धपूर्ण-
विश्वानि लोमविवरेषु महान्ति यस्य ॥
व्याजेन शोभनवपुर्बलिनिग्रहाय
प्रादुर्बभूव भगवान्वटुवामनः सः ॥ [१]

यद्वा वा अमन इति च्छेदः । मननं मनः मनज्ञाने बाहुलकाद्वन्तः । "घञबन्तः" इति पुंस्त्वम् । मनो ज्ञानपदार्थः प्रमेतियावत् । वा विकल्पात्मकः अ=नेत्यर्थः । "अभावे नह्यनोनापि" इत्यमरः । एतेन निश्चयात्मिका बुद्धिरिति पर्यवसितम् ।

विषयाकारतां प्राप्य जायते निश्चयात्मिका ॥
बुद्धिर्मनस्तु संशय्य जायते संशयात्मकम् ॥ [२]

यद्वा मास्तु बाहुलकोक्तिः । "पुंसि संज्ञायां घः प्रायेण" इति घोऽस्तु । अर्थस्तु स एव । पूर्वश्लोकेनैव गतार्थः ॥ [३]

यद्वा वां=युवयोः दूरस्थयोरिति शेषः । नः=अस्माकम् । अ=सामानाधिकरण्यं नास्ति, ऐकमत्यं नास्ति, विग्रहो नास्तीत्यादिर्यथेप्सितमर्थोऽस्तु । षष्ठीचतुर्थीद्वितीयाद्विवचनबहुवचनान्तं प्रकल्प्य यथायोग्यमर्थान्तरं च कल्पनीयम् । पदात्परत्वाभावे कथं वामादेश इति तु न शङ्कनीयम् । छन्दसि सर्वविधीनां वैकल्पिकत्वात् । यद्वा भगवान्स वामन इत्यादिदर्शनात्तत्पूर्वपदमादाय तत्सिद्धेः । यद्वा "विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा

---

(१) प्रमाणपदस्य प्रमाकरणत्वरूपोऽवयवार्थो लक्षणम् । समाख्या लक्ष्यपदम् । तन्त्रेण सकृदुच्चरितमपि प्रमाणपदं द्विधाऽऽवर्त्तनीयम् । तत्रैकं लक्षणपरमपरं लक्ष्यपरम् । तद्वद्वामनःपदस्य निरुक्तिर्लक्षणम् । समाख्या लक्ष्यपदम् । तथाच घटो घट इतिवन्नायोग्यता इति भावः । सरूपानेककार्यनिर्वहणोद्देशेनैकस्य विनियोगस्तन्त्रः । यथा प्रातर्ग्रहणे प्रातःस्नानेनोभयस्नानम् । समाख्या यौगिकः शब्दः ।

लोपो वाच्यः" इति पूर्वपदलोपः ।

सामानाधिकरण्यं हि द्वयोरेकाश्रये मतम् ।
दूरस्थयोर्भवेन्नैव व्याचष्टे वामनःपदम्(१) ॥ [४]

यद्वा वाशब्दो लोके पितृवाचकः । वा अ अमन इतिच्छेदः । तथाच पिता अमनः मनोभिन्नो न भवति(२) "अभावे नह्यनोनापि" इत्यमरः । यत्र यत्र पुत्रो मनो ददाति तदेव करोतीत्यर्थः । नञ्तत्पुरुषः ।

पिता सूनुमनस्तुल्यः स्नेहाद्भवति सर्वदा ।
अहो मायाबलं बुध्वा स्नेहं त्यक्त्वा हरिं भज ॥ [५]

यद्वा(३) वाति गच्छतीति वाः गत्यर्थकवाधातुः क्विबन्तो विजन्तो वा । मनो हि सर्वदैव गमनशीलम् । अतो "मनोजवं" इत्यादि, "चञ्चलं हि मनः कृष्ण" इत्यादि दृश्यते । अस्मिन्पक्षे मनोविशेषणत्वेन नपुंसकतया ह्रस्वत्वे वमिति भवति सम्बोधने तु वेति । तथाच व आमन इति च्छेदः । अभिविधावाङ् । अतः हेमनः हे आव सर्वत्रगमनशीलेति मनःसम्बोधनम् । मास्तु वा सम्बोधनम् । आङ्प्रश्लेषोऽपि मास्तु । ह्रस्वाभावस्त्वार्षः ।

---

(१) एतेन हरिदूरस्थस्य हरिसामानाधिकण्याभावाद्धरिप्राप्तिर्नास्तीति व्यङ्ग्यम् ।

(२) पूर्वस्थितः अशब्दः प्रसज्यप्रतिषेधपरः क्रियान्वितत्वात् । समासघटकस्तु पर्युदासपरः क्रियानन्वितत्वात् । सन्धिकार्यं तु जान्वस्य रुजतीतिवद्विदुषा बोध्यम् ।

(३) ननु शास्त्रान्तरसाधुत्वबोधिते एव शास्त्रं प्रवर्त्तते । अतः गगरी अत्रेत्यत्र यण् न । मत्प्रवृत्त्युत्तरं मदीयसन्निपातविघातकातिरिक्तेन यद्बोध्यते तदपि साधु इति पूर्वशास्त्रमुत्तरशास्त्रायाभ्यनुज्ञा ददाति तथाच लौकिकवाशब्दस्यासाधुत्वात् कथं वामनः शब्दः साधुः स्यादित्यरुचेराह यद्वेति ।

मनस्तु सर्वदा गच्छद्वायुतुल्यं ध्रुवं भवेत् ।
अतोऽदो दुर्ग्रहं मन्ये गुडाकेशवचः स्मर ॥ [६]

यद्वा सम्बोधनान्तेन वाशब्देन मुक्तमपि पितरं सम्बोध्य सर्वो जनो विलपति हेवाः हेपितः मे मनः गुणिषु दोषारोपप्रवीणं अ नेत्यर्थः । हरिभजनं न करोतीत्याद्यर्थो वा । यदा मस्तके महद्दुःखं निपतति तदा सर्वो जनो मृतमपि पितरं सम्बोध्य विलपतीति प्रसिद्धिः ।

यदा दुःखं महत्प्राप्य कार्यं निर्णेतुमक्षमः ।
लोकान्तरगतं तातं सम्बोधयति हेपितः ! ॥ [७]

यद्वा वाः पिता मन एव भवति । पुत्रो यदा दूरदेशं गच्छति तत्रैव पितापि तद्रक्षणार्थं जवेन गच्छतीतिपितुर्मनस्त्वम् ।

पुत्रस्नेहात्पिता दूरे पुत्रदेशेऽपि गच्छति ।
पुत्राधीनः पिता स्वैरी नास्ति तस्य कुतः सुखम् ॥ [८]

यद्वा वाशब्द इवार्थः । अपरो वाशब्दो लुप्तः पितृवाचकः विनापीत्यादिना तल्लोपः । पिता पुत्रस्य मन इव भवतीत्यर्थः ।

पिता पुत्रमनस्तुल्यो भवत्येव न संशयः ।
अहो पितुर्महद्दुःखं तस्मात्पुत्रो रिपुर्मतः ॥ [९]

यद्वा वाशब्दः पितृवाचको यौगिकः साधुरेव । पूर्वश्लोकेन गतार्थः ॥ [१०]

यद्वा कश्चित्पुत्रः पितृस्नेहेन आदरातिशयेन द्विर्वचनं कृत्वा वावापदेन पितरं सम्बोधयति । एको वाशब्दो लुप्तः(१) शेषार्थस्तु ७ सप्तमपक्षवद्योज्यः । पूर्वश्लोकेन गतार्थः ॥ [११]

यद्वा वा इति लोकोक्तिः । मनः वा "मनो हि दुर्ग्रहं मन्ये" इत्या-

---

(१) यद्वा वाशब्दस्य तन्त्रतास्तु ।

दिना मनो वर्णितम् । (१)आश्चर्यविषये लोके वाशब्दः प्रयुज्यत इति प्रसिद्धिः ।

आश्चर्यविषये लोके वाशब्दः सुप्रयुज्यते ।
यथा तथा मनसि स प्रयुक्तो ज्ञायतां बुधैः ॥ [१२]

यद्वा वाशब्दो नेपालान्तरवर्त्तिभाद्ग्रामभाषया जलपरः । मनो हि जलमेवेत्यर्थः । जलं हि यथा नीचैरेव गन्तुं यतते मनोऽपि तथैवेति भावः । (२)

यथा जलं निम्नदेशे स्फुटं गच्छति वै द्रुतम् ।
मनोऽपि रमते नीचैर्हरिपादं न पश्यति ॥ [१३]

यद्वा वा पिता अ मनः वा, मन इव न भवति । निषिद्धमपि कर्तुं यदा पुत्रमनः प्रवर्त्तते पिता तु तद्गुणद्धि इत्यर्थः । पूर्ववदेको वाशब्दो लुप्तः ।

यदा निषिद्धकर्मापि कर्तुमुत्सहते सुतः ।
तं निषेधति यस्मात्स पिता भवति यौगिकः(३) ॥[१४]

यद्वा एक एव वाशब्द उभयार्थकः । पूर्वश्लोकेनगतार्थः [१५]

यद्वा वा अ मनः इति च्छेदः । "अकारो वासुदेवः स्यात्"इति कोशः । अ ! हेवासुदेव ! मनो वा विकल्पात्मकं भवता वर्णितमिति शेषः ।

---

(१) अस्मिन्नपि पक्षे वाशब्दः साधुरेव । वाति गच्छतीतिवाः । वाधातोः क्विप् वा विच् । नहि आश्चर्ये शश्वत्तिष्ठति विचारानन्तरं पलायते ।

(२) अस्मिन्नपि पक्षे वाशब्दः पूर्ववत्साधुः । जलवन्मनो नीचैर्गच्छति । यथा गङ्गासूर्यादिशब्दा लोके प्रयुज्यमाना अपि संस्कृतत्वं न जहति तद्वत् ।

(३) पाति पुत्रं रक्षति इति पिता ।

अकारो वासुदेवः स्यादिति कोशेन वर्णितम्।
मनो वैकल्पिकमिति भवता बहु वर्णितम् ॥ [१६]

यद्वा वा अ आमन इति च्छेदः। वा इवार्थः। अः वासुदेवः। आ ब्रह्मा "आकारस्तु पितामह" इति कोशः। मनःपदेन तदधिष्ठाता रुद्रः। एते त्रयस्तुल्या इत्यर्थः। समाहारद्वन्द्वः।

ब्रह्माविष्णुमहेशाश्च तुल्या इति विदुर्बुधाः॥
एषां यो भेदकोऽज्ञानी नरके निपतिष्यति ॥ [१७]

यद्वा वा आ मन इति च्छेदः। वा पिता, आ माता, मनः एतत्सर्वं भगवान्वामन एव। "हरिरेव जगत्"इत्यादिनाऽभेदप्रतिपादनादिति भावः। आपदेन आमाग्रहणम्(१)। आसमन्तान्माति प्रमाणं करोति इति आमा। आङ्पूर्वो माधातुः क्विवन्तो विजन्तो वा। "विनापि" इत्यादिना मालोपः। माता हि पुत्रं माति अद्येत्थमित्यादि। हेपुत्र३ एहि इति सम्बोधनेनाह्वयाति वा।

माता पुत्रं मिमीतेऽतः सा मातेत्युच्यते बुधैः॥
आह्वानं च करोत्यस्मान्माता मा कथ्यते यतः॥[१८]

यद्वा नामैकदेशन्यायेन आपदमेव मातृवाचकमस्तु। पूर्वश्लोकेन गतार्थः॥ [१९]

यद्वा वा अ मन इति च्छेदः। अशब्दः सम्बोधनार्थमव्ययम्। तथा च हेमनस्त्वं वा पिता, तेन मां रक्ष। पातीति पिता। अपत्यं यथा पिता रक्षति तथा त्वमपि रक्ष तव व्यापारेणैव महद्दुःखम्। यतः "तस्याहं निग्रहं मन्ये"इत्यादिवचसा फाल्गुनेनापि तव दुर्ग्रहत्वं प्रतिपादितम्। त्वदधीने एव सुखदुःखे अतस्तार्किकैरपि "मनोग्राह्यं सुखं दुःखम्" इत्याद्युक्तमित्यभिप्रायेण कश्चिन्मनः प्रति वक्ति।

---

(१) अत्र आमाशब्दो नेपालभाषया मातृवाचको बोध्यः।

मनोऽधीनं सुखं दुःखं सर्वशास्त्रेषु दृश्यते ।
हरिपादं स्मरेत्तचेत्पितृवद्रक्षकं भवेत् ॥ [२०]

यद्वा पूर्वरीत्या वेति पितुः सम्बोधनम् । मन इत्यपि सम्बोधनम् । कश्चिद्दुःखपीडितो मनः पितरं च सम्बोध्य विलपति ।

पितरं च मनश्चैव सम्बोध्य विलपञ्जनः ।
दुःखी दुःखं महत्प्राप्य दृश्यते भवसागरे ॥ [२१]

यद्वा मनसि पितृत्वमध्यस्यंस्तत्संबोध्यैव विलपति । हेमन स्त्वं वा पितैवेत्यर्थः । पिता पुत्राय यथा सुखमेव प्रयच्छति तथा त्वमपि मह्यं सुखमेव देहि न तु दुःखम् । सुखदुःखे त्वदधीने । "मन एव मनुष्याणाम्" इत्युक्तेः । "मनोग्राह्यं सुखं दुःखम्" इत्यादितार्किकोक्तेश्च । पितृवद्भवत् त्वं गुरुः, अत एव विभु इति पातञ्जलमतमित्यभिप्रायः । विस्तरस्तु पातञ्जलानुयायिभिरेवावगन्तव्य इति विस्तरभयादुपेक्ष्यते ।

पातञ्जलास्तु मनसो विभुत्वं चक्षते खलु ।
अणुत्वं मनसश्चाहुस्तार्किका ऋतमत्र किम् ॥ [२२]

यद्वा वाम इति एकं पदं सम्बोधनम् । नः इति पृथक् । 'वामः शोभनदुष्टयोः" इत्यमरः । हेवाम ! हेशोभन ! दुष्ट ! वा नः अस्माकं उदासीनानां त्यक्ततृष्णानाम् वा विकल्पेन किम् । इदं वस्त्वित्थं नेत्थम् इत्यादिकुतर्केण अ=प्रयोजनं नास्ति अम=गच्छ अम गत्यादौ । एतत्पक्षे वेति काक्वार्थो योजनीयः ।

विरागिणां विकल्पेन हरिपादजुषां नु किम् ।
जितात्मनां न कर्त्तव्यं त्रिषु लोकेषु किञ्चन ॥ [२३]

यद्वा वां युवयोरनः शकटमस्ति वा नास्तीति शेषः । "क्लीबेऽनः शकटोऽस्त्री स्यात्" इत्यमरः ।

ग्रामीणयोर्मेलने तु भवतः शकटं न वा ।

वद वास्ति पुरः प्रश्नः प्राधान्यादनसस्तयोः ॥ [२४]

यद्वा नः अस्माकं अनः शकटं वां युवयोरेवेति भङ्गश्लेषः । यथोः परस्परं प्रीतिस्तयोरुक्तिः ।

येषां लोके महाप्रीतिस्तेषां वस्तुनि नो भिदा ।

इत्यर्थमप्यदो ब्रूते वामनःपदमेव च ॥ [२५]

यद्वा कश्चिन्निर्विण्णः पुरुषो मनः सम्बोध्य वक्ति हेमनः ! वा अथवा त्वं अम=गच्छ मां त्यज । त्वत्संसर्गादेव भवार्णवनिमग्नः, अतः परं सुखी भविष्यामि, अत एव "मन एव मनुष्याणाम्" इति श्रूयते । भङ्गश्लेषः ।

निर्विण्णः पुरुषो ब्रूते मनः प्रति भवार्णवे ।

निमग्नमिन्द्रियाधीश ! पाहि मां शरणागतम् ॥

विधिप्रार्थनयोर्लोट् ॥ [२६]

यद्वा वा आम इति च्छित्वा भङ्गश्लेषबलान्मन इत्यपि च्छेदः । हे आम ! आसमन्तान्माति मानं करोतीति आम मनोविशेषणत्वेन नपुंसकह्रस्वत्वे साधु । मन इत्यपि सम्बोधनम् । मनः सम्बोध्य कस्य चिदुक्तिः । "आतश्चोपसर्गे" इति का(१)न्तो मशब्दः सम्बोधनान्तः । मामाङ्माने धातवः ।

मानं करोषि सर्वेषां वस्तूनां च त्वमेव हि ।

एतत्प्रमाणमेतद्धीत्येवं निर्णायकं मनः ॥ [२७]

यद्वा अमरोगे पचाद्यजन्त आङ्पूर्वः । अस्मिन्पक्षे हेमनः ! हे आम ! रोग ! त्वं अम गच्छ । रोग इव प्रतिभासि, उपमायां वाशब्दः । रोग इव पीडाकरत्वान्मनोऽपि दूरीकुर्वन्ति "सर्वे मनोनिग्रहलक्षणान्ताः" "परो हि योगो मनसः समाधिः" इत्यादि दृश्यते।

---

१) विच्क्विबन्तो वा ।

यथा रोगो दुर्ग्रहो वै तथा त्वमपि सर्वदा ।
तस्माद्रोग इवाभासि त्वन्निरोधः कथं भवेत् ॥ [२८]

यद्वा अस्मिन्पक्षे अकर्त्तरि च कारके घञि उपधावृद्धिरस्तु आङ्पूर्वत्वं मास्तु । समाधिना औषधेन अम्यते रोगवत्क्रियत इति आमः तत्सम्बुद्धिः । कर्मघञन्तः करणाधिकरणादौ वा ।अर्थस्तु विस्तरभयादुपेक्षितः । पूर्वश्लोकेन गतार्थः ॥ [२९]

यद्वा "अप्राणो ह्यमनाः शुद्धः" इति श्रुत्या मनःसंसर्गराहित्येन प्रतिपादितोऽपीश्वरोऽमनो मनो नेति काकुः । मनोरूप एव बभूव । मन इवानेकोपद्रवं चकार । बलिं निग्रहीतुं वामनरूपं गृह्णन्नपि विश्वरूपं दर्शयामास, बहुशो दनुजान्निजघान, कविचक्षुर्भेदयामास, स्वयं बलिद्वारपो बभूवेतितात्पर्यम् । पक्षद्वयबोधकेन वापदेन कार्यकालपक्षे तु मनःस्वरूप एव भवन्प्रमाथी दुर्ग्रहश्च भवन् बहूपद्रवं चकार । श्रुतिस्तु यथोद्देशपरा । कार्यकालक्षे शुद्धपरा । शुद्धोऽप्यशुद्ध एव भवेदिति ध्वनिः ।

शुद्धोऽप्यशुद्धः कार्येण संसर्गाज्जायते खलु ।
शुद्धोऽपि भगवाञ्जातो मायया सगुणस्तथा ॥

अत्रेदं विस्तार्यते । तथाहि—

न भूमा(१) वामनः किन्तु मनो वैकल्पिकं स्मरन् ।
तद्बोधनाय ह्रस्वोऽभूद्वामनो न तु वामनः ॥

विष्णुपक्षेऽकारान्तो वामनशब्दः । स एवार्थान्तरे नपुंस-

(१) भूमा सम्प्रसादादध्युपदेशादिति सूत्रे धर्मधर्मिणोः सामानाधिकरण्यादभेदाध्यवसायोक्तेर्धर्मपरस्यापि भूमपदस्य भावेमनिजन्तस्य धर्मिपरत्वम् । तेन द्युभ्वोतभूमपदमक्षरमीक्षणीयमित्यादि सङ्गच्छते । "पुङ्गवे विभूम्नि"इत्यादि भागवतं मानम् । धर्मपरस्यापि धर्मिसामानाधिकरण्यान्नीलो घट इत्यादि च प्रयुज्यते ।

कः सान्तः । तथाच अकारान्तपुंलिङ्गवामनशब्दवाच्योऽपि भगवान् कार्यकालपक्षे नपुंसकमनःशब्दवाच्यो जातः । अयमभिसन्धिः । याञ्चासमये खर्वस्वरूपमादाय नैष्ठिकब्रह्मचर्यं दर्शयन्दानमादाय वृत्तिं लब्ध्वा वृत्तिदातुरेव सर्वस्वं व्याजेन जग्राह । बलिं निषेधन्तं(२) कविमपि चक्षुर्निर्भेद्य काणं चकार ।

---

(२) निषेधन्तं कविमित्यस्यायं भावः । विभुरप्ययं कुतो ह्रस्वीभूय वामन इतिनाम्ना प्रथितोऽभूत् । तस्यायमाशयः । ममैतन्नामैव दातारं बलिं निषेधति । तस्यायमर्थः । हेवाम ! हेशोभन! हेऋजुबुद्धे । हेनः हेपुमन् ! हेबले!वा = निश्चयेन आम् = भूमिं प्रयच्छामीत्यङ्गीकारः अ = त्वया न कर्त्तव्यः।करोषि चेत् प्रतिश्रुत्यादातुस्तव नरकवासः स्यात् तथासति त्वं वामनः नीचः स्याः । प्रतिश्रुत्यादाता नरकवासी नीच एव भवति इत्येवमर्थबोधनाय विभुर्विष्णुर्वामनः स वततार । तस्मादस्मै मादादिति कवेरभिप्रायः । बलेरभिप्रायस्तु हे अनः ! अः निषेधो विद्यते यस्मिन्निति अर्श आद्यच् । स चासौ ना इति कर्मधारयः।तत्सम्बुद्धौ हे अनः!। यद्वा एन निषेधेन युक्तो ना इति शाकपार्थिवादिसमासः। निषेधं कुर्वन् हे कवे!वा = निश्चयेन आम् = अङ्गीकरोमि इति काव प्रति बलेरुक्तिः। पुनर्बलिर्वदति असौ वामनः । एतन्नाम्नोऽयमर्थः ।अ हेवासुदेव ! हे नः हेपुमन्! वा निश्चयेन आम् अङ्गीकारः भवान् सर्वान्तर्यामी वासुदेव एव नररूपेण समागतोऽसि अहो मम भाग्यमिति शेषः । तुभ्यं प्रतिश्रुत्य ददाम्येव। अवाम सर्वं मम हार्दं त्वं जानीहि हेनः हेपुरुषेति बलेरुक्तिः । अवोपसर्गाकारस्य भागुरिमते लोपः । नः इति सम्बोधनार्थस्तु नयति प्रापयति कर्मफलं ना तत्सम्बोधने हेनः हे कर्मफलदातः "नयतेर्डिच्च"इतिसाधु। वामनःपदमेवोक्तिप्रत्युक्ती ब्रूते इति विचार्यम् ।

यद्वा वाम् पदे ओङ्कारान्तर्भावस्य वक्ष्यमाणत्वात् अ हेवासुदेव ! हेनः हेओम् हेब्रह्मन् ! ॐम् अङ्गीकार इति बलेरुक्तिः ! ओमित्यङ्गीकारे ब्रह्मणि च ।

यद्वा हेनः हेपुमन् हेशुक्र ! वा निश्चयेन आम् अङ्गीकारं अ नैव कुरु इति त्वया निषिध्यते परन्तु नासौ विष्णुः किन्तु वामनः । वा वि-

ईश्वरोऽपि कार्यकालपक्षे मन एव भवन् महोपद्रवं चकार । अहो कार्यगौरवम् । ईश्वरोऽप्येतत्पक्षे अमनस्कत्वेन लिङ्गराहित्येन प्रतिपादितोऽपि तद्विरुद्ध एव जातः । परन्तु मनःस्वरूप एव बभूव । ह्रस्वो बभूवेतियावत् । "न स्त्री न षण्ढो न पुमान्न जन्तुः" इति श्रुतिप्रतिपादितोऽपि तद्विरुद्ध एव बभूव । मनसो नपुंसकत्वं तु "नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः" इति कविभिर्वर्णितम् । कार्येण काल्यते स्वसन्निधिं प्राप्यत इति कार्यकालः । कार्यनिर्वाहाय गुणशास्त्राणि विध्येकवाक्यतापन्नानि भवन्ति । एवमीश्वरोऽपि एकोऽहं बहु स्याम् इति इच्छुर्मायासम्बद्धोऽनेककार्याणि जगदुत्पत्त्यादीनि करोति स्वावतारांश्च । स्वभक्तगोपिकावस्त्रचौर्यादि कृत्वा दुकूलचौरपदवाच्योऽपि भवति । अहो कार्यकालपक्षबलम् । उद्देशमनतिक्रम्येति यथोद्देशम् । उपदेशदेशे जायमानवाक्यार्थबोधेन सर्वत्र शास्त्रे व्यव-

---

विधा मा सम्पद् यस्य स चासौ नः सौगतः । "नकारः सौगते बुद्धौ" इतिकोशः । अयं भावः । त्वं नृशब्दवाच्यः शुक्रत्वात् । नृशब्दश्च शुक्रे एव प्रयुज्यते तव नामैव शुक्रः । त्वत्कृतोऽयं दुःखनिधिर्महाप्रपञ्चोपद्रवः स्त्रीपुंसयोर्योनिसम्बन्धश्च त्वत्कृत उपद्रव एव । नयति प्रापयति स्त्रीपुंसौ योनिसम्बन्धं ना इति नृपदार्थः स च त्वमेव शुक्रः । त्वामन्तरा नासौ संसारोपद्रवः स्यादित्यन्वयव्यतिरेकव्याप्त्यानुमीयते ।

यद्वा हे वाम ! हेकुटिल ! दानप्रतिरोधक ! विघ्नकारिन्निति यावत् हेशुक्र वा निश्चयेन अ विष्णुर्न आम् मया अङ्गीकृतः ।

यद्वा मापदेन नामैकदेशन्यायेन मायाया ग्रहणम् । तेन वा विविधा माया यस्य तत्सम्बोधनम् । हेनः ! हेशुक्र ! । यद्वा वामश्चासौ ना इति एकपदमस्तु । अयं भावः । त्वं मायावी कपटी त्वच्छिक्षयैव वयं दनुजा मायाविन इत्यपि बलेराशयः । अनयोरुक्तिप्रपञ्चेनालम् । विभोर्नामैव वामनः तदर्थश्च गम्भीरतरः तं साकल्येन वक्तुं को नामेष्टे ।

हारो यथोद्देशपक्षः। अस्मिन् पक्षे गुणशास्त्राणि विध्येकवाक्यतापन्नानि न भवन्ति, स्वोपदेशदेशे जायमानवाक्यार्थबोधेनैव कार्याणि निर्वहन्ति। ईश्वरोऽपि यथोद्देशपक्षे शुद्ध एव सन् अप्राणो ह्यमना भवति अतः श्रुतिर्यथोद्देशपरा। एतद्विषयस्य दुरूहत्वान्मुहुर्मुहुः प्रदर्शनं स्पष्टप्रतिपत्तये।

नात्रातीव प्रकर्त्तव्यं दोषदृष्टिपरं मनः।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते॥
इति विदुषो वारंवारं प्रार्थये॥ [३०]

यद्वा वामेति सम्बोधनम्। हेवाम! हेशोभन! हेदुष्ट! वा। हेनः हेपुमन्! इति कश्चित्सम्बोधयति। अतो वामनोऽसि वामनोऽपि भक्तदृशि अतीव सुन्दरोऽसि, सर्ववेदेषु पुरुषपदवाच्योऽसि, दैत्यदृशि तु दुष्टोऽसि मर्त्योऽसि इत्यर्थः।

वामनं शोभनतरं दृष्ट्वा देवास्तु तुष्टुवुः।
शत्रुभावेन देवेशं दैत्या दुष्टं स्म चक्षते॥ [३१]

यद्वा वामं यथा स्यात्तथा नयति प्रापयति इति ना तत्सम्बोधनं हेनः! अयं भावः। भक्तं प्रति सर्वपदार्थान् शोभनं यथा स्यात्तथा प्रापयसि दैत्येभ्यस्तु अमृतमपि सुराव्याजेनैव प्रयच्छासि इति। "नयतेर्डिच्च" इतिसाधुः।

भक्तेभ्यस्तु सुधां दत्त्वा दैत्येभ्यस्तु सुरां ददौ।
विष्णोस्ते भक्तवात्सल्यं तस्मादुद्धर मां प्रभो!॥ [३२]

यद्वा नः अस्माकं भक्तानां वाम! शोभन! इति भक्तोक्तिः।

भक्ताः स्तुवन्ति देवेशं वामनं शोभनेति तम्।
दृष्ट्वाद्भुतं महाश्चर्यं वपुः सर्वाङ्गसुन्दरम्॥ [३३]

यद्वा नोऽस्माकं दैत्यानां वाम दुष्टेति दैत्योक्तिः।

सर्वाङ्गसुन्दरं देवं श्रीधामानं सुरारयः।

कुपूयोऽयं नदस्याहः प्राहुर्नः शत्रुरेव च ॥ [३४]

यद्वा वमयति उद्गारयतीति वमः । टुवम उद्गिरणे । णिजन्तात्पचाद्यचि अमन्तत्वाद्ध्रस्वत्वे वमः । स एव वामः । स्वार्थेऽण् । तथाच नोऽस्माकं दैत्यानां वाम उद्गारक इति सम्बोधनम् । यैर्दितिजैर्महता तपसा त्रैलोक्यं लब्धं तदपि विषवद्भूत्वा वमनं कारयासि अत एव वामनो नामासीत्यर्थः ।

ईश्वरप्रतिकूलं यद्भुज्यते सुरशत्रुभिः ।
छर्दयित्वा विषीभूत्वा निर्गच्छति न पच्यते ॥ [३५]

"ईशावास्यमिति" श्रुतिरत्र मानम् ।

यद्वा वामा योषित् "वामा वनिता" इत्यमरः । सा यस्यास्तीति वामः । अर्श आद्यजन्तः । तत्सम्बुद्धौ हेवाम ! हेसवनित ! त्वं न नैष्ठिकब्रह्मचारीति भावः । नः अस्मान् वा ब्रह्मचारीव आम बोधय । अम गत्यादौ णिजन्त आङ्पूर्वो लोण्मध्यमपुरुषैकवचनान्तः । गत्यर्थानां ज्ञानार्थत्वेन प्रसिद्धेः । अतो वामनोऽसीति बलेरुक्तिः । युञ्जानयोगी बलिरेतादृशं लोकोत्तरं वामनरूपं दृष्ट्वा सर्वा अप्सरसोऽपि मुह्यन्तीत्ययमवश्यमेव सयोषिन्नैव ब्रह्मचारीति निन्दति । नासौ सुन्दरादतिसुन्दरतरो नैष्ठिकब्रह्मचारी भवितुमर्हति। उपकुर्वाणस्तु कदाचिद्भवेदपि । मां विप्रलब्धुमेवासौ नैष्ठिकब्रह्मचारी । न नैष्ठिकब्रह्मचारी वृत्तये भूमिं याचते तस्य कृत्याभावादित्यादिबलिविचारः । विचिन्त्यैव युञ्जानयोगी सर्वं जानाति ।

बलिर्निन्दति नैव त्वं नैष्ठिको वृत्तिमिच्छसि ।
यतो भवेः कदाचिद्वा उपकुर्वाण एव च ॥ [३६]

यद्वा युञ्जानयोगी बलिर्विचारयन् अयं नारायणः कृष्णावतारे षोडशसहस्रवनितापतिर्भावीति बोधयन् त्वं ब्रह्मचा-

रिव्याजेनैवागतोऽसि परन्तु नैव ब्रह्मचारीति गर्हयन् वामेतिसम्बोधयामास। भगवतापि बलिना सम्यगुज्ञातोऽहमिति लज्जया वा अ इत्युक्त्या विकल्पेन निषेधः कृतः। तस्यायं भावः। इदानीं तु ब्रह्मचार्येवास्मि कृष्णावतारे तादृक् भविष्यामीतिबोधनाय विकल्पेन निषेधः कृतः। सलज्जस्यायं स्वभावो लोके दृश्यते।

वनितायुग्भवेद्वामो यतोऽर्शआद्यचा युतः।
कथं स नैष्ठिको ज्ञेयो वामया नित्ययुग्यतः॥ [३७]

यद्वा नः अस्माकं वाम ! प्रतीप ! प्रतिकूल ! इति दैत्यानां सम्बोधनम्। देवानां तु नः अस्माकं वाम ! हेसुन्दर ! वल्गो ! इति सम्बोधनम्। देवासुरास्तदेत्थं सम्बोधयामासुः। अतो वामनो नामेत्यर्थः। "वामौ वल्गुप्रतीपौ द्वौ" इत्यमरः।

दैत्यानां प्रतिकूलोऽसि द्विषत्त्वेनेति ते जगुः।
देवास्तु सुन्दरतरो वामनोऽसीति पालकः॥ [३८]

यद्वा तत्रत्यानां योषितामुक्तिर्वामेति सम्बोधनम्। हेवाम ! नः अस्माकं हेकन्दर्प ! इति सम्बोधयामासुः। तत्रत्या योषितः कामरूपमेव ददृशुः, अतो वामपदेन कामत्वेनाध्यवस्यन्त्यः सम्बोधयामासुः(१)। सर्वं वाक्यं क्रियान्वितमिति न्यायाद्यथायथं क्रियाध्याहारः अस्माभिः साकं विहरेत्यादि।

योषितस्तु स्मरं दृष्ट्वा पञ्चबाणप्रपीडिताः।
लज्जां विहाय क्रीडस्व प्राहुरित्थं वचस्तदा॥ [३९]

यद्वा तत्रत्यानां केषाञ्चित्तु नः अस्माकं वाम ! सव्येतिसम्बोधनार्थः "सव्यं दक्षिणवामयोः" इत्यमरः।

वामोऽयं दक्षिणो वेति संशयं कुर्वतेस्म के।

---

(१) वामः काम इति हैमः।

तस्मादुल्लुखविषयो बभूवादितिनन्दनः ॥ [४०]

यद्वा घनश्यामं भगवन्तं दृष्ट्वा मेघोऽयमिति भ्रान्त्या हेवाम ! हेमेघश्यामसुन्दरेति केषाञ्चित्सम्बोधनम् । नः अस्माकम् "वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इति विश्वः ।

मेघश्यामं वामनं तं दृष्ट्वा भ्रान्त्या घनं जगुः ।
सर्वे भ्रेमुस्तदा केऽपि निर्णयं नैव चक्रिरे ॥ [४१]

यद्वा तत्रत्या मयूरा मेघानिभं भगवन्तं पश्यन्तः पयोधरत्वेन सम्बोधयन्ति । मेघं विना नान्यत्तेषां सुन्दरत्वेनाभिमतमस्ति यतः पयोधरमेव दृष्ट्वा बर्हिणो नृत्यन्ति । नः अस्माकं मयूराणां वाम ! अतिसुन्दर ! नोऽस्मान् आम नर्त्तय । उपमायां वाशब्दः यतो भवान्मेघनिभः । आङ्पूर्वो गत्याद्यर्थकोऽमिधातुः ॥ [४२]

यद्वा चातका मेघदत्ता एव अपः पिबन्ति अतो मेघश्यामं हरिं दृष्ट्वा वामत्वेन सम्बोधयामासुः । नोऽस्माकं चातकानां वाम ! सुन्दर ! जीवनदातृत्वात्, नः अस्मान् आम तर्पय । तृप्त्यर्थः अमधातुराङ्पूर्वः । वा विकल्पार्थः । तथाचापो न ददासि चेत् अम जहि अम रोगे । भूमिपतितं जलं तु रुधिरीभूतं रोगं जनयति अतस्तत्पीत्वा म्रियन्ते चातका इति प्रसिद्धिः । गत्याद्यर्थकोऽमिरन्तर्भावितण्यर्थः । प्रकरणादमरोगे चुरादिरपि बाहुलकाण्णिजभावे लोण्मध्यमपुरुषैकवचनान्तः ।

मेघश्मामं हरिं दृष्ट्वा बर्हिणो ननृतुस्तदा ।
चातका अप ऐच्छन्हि हरिं नौमि मुहुर्मुहुः ॥ [४३]

यद्वा वा आम इतिच्छेदः । आमशब्दोऽपक्ववाचकः । हेआमेतिसम्बोधनम् । तच्च यथावेषं पश्यतां पृथक् जनानाम् । तथा च नोऽस्माकं मध्ये । निर्धारणे षष्ठी । हेआम ! अपक्व ! अर्थाद्बटो बालक हेवामातिसुन्दर ! नोऽस्मान् अम जानीहि । गत्यर्थकामधातोर्ज्ञाना-

र्थत्वादेतेषां मध्ये इमे एतादृशा इति सर्वान् जानीहीतिभावः । आमेतिपृथक्पदे वाशब्दो विकल्पार्थः अथवा इत्यर्थः । लोके इयं रीतिः बालं दृष्ट्वा हेबाल ! अहं कः, मां जानीहि इति पृच्छति । त्वमतीव सुन्दरोऽसि हेवामेत्यादिवचसा बालं लालयति ।

अतीवसुन्दरं बालं दृष्ट्वा ऽऽस्थानास्थिता जनाः ।
ऊचुरस्मान्विजानीया वयं के तेऽङ्ग ! सुन्दर ! ॥ [४४]

यद्वा वा अम नः इतिच्छेदः । अमाशब्दो नामैकदेशे नामग्रहणन्यायादमावास्यामाहेति व्याख्यातारः । अमशब्दोऽर्शआद्यजन्तः। तथाच अमा कुहूः सा यस्यास्तीति अमः तत्सम्बुद्धिः । पिको हि कुहूशब्दं नित्यमेवाह तस्मादमः स एव । "कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपि" इतिविश्वः । नोऽस्माकं विरहिणाम् । हे अम ! पिकसदृशेति सम्बोधनम् । वा निश्चये । पिकोऽपि कृष्णो हरिरपि तथेति विरहिणो हरिं पिकत्वेन सम्बोधयामासुः । कुहूशब्दं श्रुत्वा अद्य अमावास्यातिथिस्तस्मादस्माकं वैरी चन्द्रो नेष्ट इति तदभिप्रायः । तरुस्थपिकशब्दं श्रुत्वा अनेनैव कृष्णवटुना पिकतुल्येन कुहूशब्द उच्चारित इति भ्रान्त्या पिक इवेति सम्बोधयामासुः । विरहिणो हि वस्तु निर्णेतुं नेशते । उपमोत्प्रेक्षा वा ।

कृष्णरूपं हरिं दृष्ट्वा पिकोऽयमिति बभ्रमुः ।
विरहिण्यः कुहूशब्दं श्रुत्वा च जहृषुस्तदा ॥ [४५]

यद्वा वा अम इतिच्छेदः । अमाशब्दोऽव्ययम् "अमा सह समीपे च" इत्यमरः । अमाशब्दः अर्शआद्यजन्तः सम्बुद्ध्यन्तः । नोऽस्माकं भक्तानाम् अम ! हेसमीपस्थ ! वा नोऽस्माकं हृदा सह वासकर्त्तः हेवाम ! अतीवसुन्दर नोऽस्मान् अम जानीहि भज वा आह्वय वा । अमगत्यादौ लोण्मध्यमपुरुषैकवचनान्तः । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवदुक्तेः ।

"नाहं वसामि वैकुण्ठे योगिनां हृदयेऽपि वा ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ! ॥"

इत्युक्त्या भक्ता एवातिप्रियाः अतो भक्तभक्तिमानिति दृश्यते ।

हरेऽस्मान्भज भक्तांस्त्वं वयं त्वामपि सर्वदा ।
भजाम उभयोर्भक्तिः परस्परमिति प्रभो ! ॥ [४६]

यद्वा हरिहरयोरैक्यवादिनो भक्ता नः अस्माकं हेवाम ! हे उमानाथ ! इतिसम्बोधयन्ति "वामः कामः सव्ये पयोधरे । उमानाथे प्रतीकूले चारौ वामा तु योषिति" ॥ इति हैमः ।

येषां हरिहरावैक्यौ तेषामुक्तिरितीर्यते ।
हरिं चापि हरं प्राहुरहो चारुमतं मतम् ॥ [४७]

यद्वा हेवाम ! हेप्रतीकूल ! हेशत्रो ! इति दैत्यकृतं सम्बोधनमस्तु । दैत्यपक्षोक्तश्लोकेन गतार्थः । [४८]

यद्वा वा अमन इति च्छेदः । वा इवार्थः । न विद्यते मनो यस्मिँस्तदमनः क्लीबम् । तदपि मन इवेत्यर्थः । क्लीबस्य यद्यपि मनोऽस्ति तथापि तस्य प्रियानुरागाभावान्न तन्मनो मनः । अयं भावः । क्लीबस्य न प्रियाऽनुरागः यदा तु प्रियासंसर्गस्तदा तदपि मन इव भवति अनुरागि भवति प्रियासक्तो भवतीतियावत् । अत एव "दृशा दग्धं मनसिजं" इत्युक्तिर्वामलोचनाः प्रशंसति । विरागिपक्षे तु "स्त्रीणां तत्सङ्गिसङ्गानां" इति निषेधात् अ इत्यपि भङ्गश्लेषबलाच्छित्वा स्त्रीसङ्गो निषिध्यते इति स्त्रीणां पक्षद्वये स्तुतिनिन्दे बोधिते इति ध्वनिः ।

स्त्रीसङ्गाज्जायते क्लीबः पुमानहह चित्रता ।
विरागिणस्तु मन्यन्ते स्त्रियो विषमिति स्थितिः ॥ [४९]

यद्वा वामेति मनःसम्बोधनम् । वामा वनिता यस्यास्तीति-

वामम्। अर्श आद्यजन्तः। स एव सम्बुद्ध्यन्तः। हेमनः! मन अः इत्यपि भङ्गश्लेषमहिम्ना च्छेदः। अयं भावः। स्त्रीसङ्गात्पूर्वं मनोऽपि त्वममन एवासीः स्त्रीरहितानां कर्त्तव्याभावान्मनसे किमपि न रोचते अतो मनोऽप्यमन एव नोऽस्माकं विरागिणां ज्यायसां श्रीविश्वनाथैकशरणानामिदानीं तु मन एवासि प्रियासङ्गात्तु विरागिणामपि पुत्रोत्पादनद्वारा भवार्णवे क्लेशयसि सर्वमेतत्त्वत्कृतोपद्रवं मन्ये। अतो मुहुर्मुहुः "मनो हि दुर्ग्रहं मन्ये" इत्यादिना मनोनिन्दा श्रूयते। प्रियानिन्दापि "योषित्सङ्गाद्यथा" इत्यादिना श्रूयते। अतो मनःप्रिये निन्द्येते इति मनः प्रति विरागिणामुक्तिः।

मनःप्रिये विनिन्दन्ति त्यक्तरागा जितेन्द्रियाः।
संसर्गाच्चेऽपि जायन्ते रागिणोऽतो भवार्णवे ॥ [५०]

यद्वा मनः सम्बोध्य मद्विधो निर्विण्ण आचष्टे। हेमनः त्वं पूर्वं मनः आसीः कदा इति चेद्यदा नाहं विरागी तदैव। इदानीं तु त्वममनः मनोभिन्नमेवासि स्वधर्मौ सुखदुःखे त्यजसि अतो मनोभिन्नमिवाभासि। वा इवार्थः।

निर्विण्णः कश्चिदाचष्टे मनः प्रति निबोधय।
पूर्वं त्वं मन एवासीरिदानीं त्वमनो मनः! ॥ [५१]

यद्वा वामेति मनःसम्बोधनम्। मन इति च तत्सम्बोधनम्। हेवाम! हे अतिसुन्दर! हेमनः! अशब्दो निषेधार्थः। (१)नः अस्माकं निर्विण्णानामात्मारामाणां स्तुतिनिन्दाभ्यां किम्, दैन्यं हर्षश्च नास्ति। महान्तो निन्दन्तु वा स्तुवन्तु वा। अ हर्षशोकौ

---

(१) सङ्कीर्णश्लेषबलाद्वा अ इत्यपि च्छेदः। वाशब्दो विकल्पार्थः। स्तुतिनिन्दान्यतरपर इतिभावः

विहाय त्वमजस्रं श्रीवामनपादं वाम(१) निश्चयेन जानीहि भजस्वेतियावत् इति निर्विण्णोक्तिः ।

निर्विण्णानां स्तुतिः का वा निन्दापि भगवत्पदम् ।
मनो भजस्व तस्मात्त्वं पारङ्गामि भवार्णवात्(२) ॥[५२]

यद्वा वाम इति मनःसम्बोधनम् । नोऽस्माकं विरागिणां हेवाम ! हेद्रविण ! हेमनः ! एतेन विरागिणां मन एव द्रविणं धनमित्यर्थः "वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इति विश्वः । वा इवार्थः । तेन द्रविणं तु मन इव परमार्थतो धनीभूतं मन इव । अयं भावः । असन्तुष्टानामेव द्रविणं धनं परमार्थतो धनमेव मुख्यम् । अतस्ते हि कर्त्तव्याकर्त्तव्यमविचार्य धनार्जने यतन्ते सन्तुष्टमनसां तु त्वत्सन्तोष एव धनम् ।"असन्तोषात्पतत्यधः" । "असन्तुष्टा द्विजा नष्टा" इत्युक्तेः । तस्माद्यथालाभेन सन्तुष्यानवरतं श्रीवामनं वा अम । वा अवधारणे । निश्चयेन अम जानीहि भजस्वेति विरागिणामुक्तिः । अमधातोर्गत्यर्थस्य ज्ञानार्थत्वम् । तच्च लोण्मध्यमपुरुषैकवचनान्तम् । लोके इयं रीतिः । अतिचञ्चलं बालकमश्वादिकं चाश्वासनेनैव स्थिरीकुर्वन्ति न तु ताडनेन । ताडने तु अतिचञ्चलतरा एव भवन्ति, तद्वन्मनोऽपि स्थिरीकर्त्तुं विरागिणामुक्तिः । मनःस्थैर्येण वैराग्यदार्ढ्यादिति तात्पर्यम् । वैराग्येण मनोनिग्रहः "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" इति भगवतोक्तेः ।

मनश्चाञ्चल्यरोधाय सुन्दरत्वं ब्रुवन्ति ते ।

---

(१) वा अम इति च्छेदः । वा अवधारणार्थः । अमधातोर्गत्यर्थस्य ज्ञानार्थत्वम् । लोण्मध्यमपुरुषैकववचनान्तः ।

(२) भविष्यति गम्यादय इतिणिनिः । बाहुलकाद्वृद्धिः "अकेनोर्भविष्यदाधमर्ण्ययोः" इति षष्ठीनिषेधात् द्वितीया । गमीति वा पाठः ।

विरागिणां धनं नैव धनं किन्तु मनो धनम् ॥ [५३]

वामपदस्य सव्यादिपरत्वेऽपि यथायथमर्थान्तराण्यूह्यानि विस्तरभयादुपेक्ष्यन्ते।

यद्वा वा आमनः इति च्छेदः। अभिव्याप्तावाङ्। अभिव्याप्तं मनो व्यापकीभूतं मनः आमन इत्युच्यते। आमनस्त्वं च परमविभुत्वम्। तच्च न हीश्वरमृतेऽन्यत्र सम्भवति। "सर्वा भूतानि त्रिपादस्यामृतन्दिवि" "महतो महीयान्" इत्यादिश्रुतेः। अत एव पातञ्जलैर्मनसो विभुत्वमवादि। तच्च भगवत्येव पर्यवस्यति अतः आमनो वामन इत्यर्थः। मनसो विभुत्वं मन्यमानाः हार्दोपासका अपि ईश्वरत्वबुद्ध्यैव तदुपासते। अतस्तदेव वामनो ह्रस्वः कथमामनो विभुरितिविरोधाभासस्तु ईश्वरत्वबुद्ध्या समाधेयः।

वामनोऽपि विभुर्विष्णुरहो लीलाविचित्रता।
बलिविध्वंसिनो यस्य तस्य पादं स्मराम्यहम् ॥ [५४]

यद्वा श्रीवामनस्त्रिविक्रमः नोऽस्माकं विजयतेतराम्। यतोऽस्माकं भक्तानां वामत्वेन शोभनत्वेन प्रतिभासि अतो वामेतिपदेन सम्बोध्योऽसीतियावत्।

वामनत्वात् भवान्देवस्त्रिविक्रम इतीर्यते।
जलावरणभेदेन पदा गङ्गा विनिःसृता ॥

अस्यार्थः। "खर्वत्वाद्वामननामको देवो भवान्त्रिषु स्वर्गमर्त्यपातालेषु त्रिभिरेव पादैर्विक्रमणं व्याप्तिमकार्षीत्तत एव त्रिविक्रम इति संज्ञासंज्ञितः। जलावरणभेदेनेत्यस्यायं भावः। अयं ब्रह्माण्डकटाहः भगवत्स्थूलरूपम्। तच्च "मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्" इतिभागवतम्। तेष्वावरणेषु त्रिविक्रमावतारं गृह्णता ऊर्ध्वमुत्क्षिप्तेन पदा जलावरणं बिभेद। भगवत्पादं मार्जती भगवत्पादस्पर्शादात्मानं च सृजती जगदपि पवित्रीकुर्वती भगवत्पदाङ्गुष्ठा-

द्विनिःसृता गङ्गा।

अङ्घ्रिदण्डो हरेदूर्ध्वमुत्क्षिप्तो बलिनिग्रहे।

विधिविष्टरपद्मस्य नालदण्डो मुदेऽस्तु नः॥ [५५]

यद्वा मनोऽणुत्ववादितार्किकपक्षे तु ईषदर्थकेन आङुपपदेन मनोविभुत्ववादिपातञ्जलमतव्युदासः। ईषदर्थक आङ्। एतेन वा आमनः इति च्छेदो दर्शितः। आ च तन्मन इति कर्मधारयः वाशब्दो विकल्पार्थकः। तथाच अणुस्वरूपं मनः। पक्षे कार्यकालपक्षे नैयायिकमतमवलम्ब्य आमनः सद्वामनो ह्रस्वो भवति। पातञ्जलपक्षे तु आमनो विभु एव मनो वामनस्त्रिविक्रमो भवति त्रिविक्रमो विष्णुर्यथोद्देशपक्षे भूमा एव बभूव स्वस्वरूपं नैव तत्याज। कार्यकालपक्षे तु स्वस्वरूपं त्यक्त्वा ह्रस्व एव बभूव "अणोरणीयान्महतोमहीयान्" इति श्रुतिः पक्षद्वयाभिप्रायेणाणुत्वं महत्त्वं च बोधयति। अणुस्वरूपं मनः वामनः त्रिविक्रमः "अणोरणीयान्" इति श्रुतेः पक्षद्वयेन भूमापि अणुर्भवति। ईश्वरो हि यद्यदिच्छति तत्तत्करोति। अयमेवेश्वरत्वमाहिमेति बोधितः।

भूमापि लीलया विष्णुर्जायतेऽणुर्यतः श्रुतिः॥

अणोरणीयानिति तामेवाश्रित्यापि तार्किकाः॥ [५६]

यद्वेयं लौकिकोक्तिः ईषन्मनः स्वल्पं मनः आमनः तदेव वामनः। अयं भावः नेपालदेशीया हि ब्राह्मणचित्तं मक्षिकापित्तमिति वदन्ति। ब्राह्मणाः क्षुद्रतरा इति ते ब्राह्मणान्निन्दन्ति ब्राह्मणपर्यायस्तेषां वामनशब्दः।

(१)ईषन्मनो वामनो वै मक्षिकापित्तसन्निभः।

इत्यादिनिन्दया दुष्टा निन्दन्ति ब्राह्मणं ध्रुवम्॥ [५७]

यद्वा आमनः भगवतो मनः आमनो भवति विभु भवति,

(१) कर्मधारयः।

अभिव्याप्ताववाङ् । तदपि मनः ईषन्मनो बभूव त्रिभ्वपीश्वरमनो निरपराधिनं बलिं व्याजेन बबन्ध । अत ईषन्मनो बभूव । पश्चात्तु भक्तवात्सल्यादामन एव बभूव अभिव्याप्तिमद्बभूव इतियावत् । स्वयं द्वारपो भूत्वा स्वाराज्यादप्यधिकतरं बिलस्वर्गं ददौ पूर्वं दण्डयित्वा पश्चात्तु कृपामेव चकारेति विकल्पोऽयम् । वा विकल्पार्थः । अतो वामन इत्युच्यत इति भावः । "आङीषदर्थेऽभिव्याप्तौ" इत्यमरादयमर्थो लभ्यते ।

ईश्वरस्य मनो भूम जायते कार्यगौरवात् ।
तुच्छमेवेति विज्ञेयं किं पुनर्विषयात्मनाम् ॥

वाशब्दस्योपमापरत्वपक्षेऽपि सत्यसङ्कल्पवत ईश्वरस्य मनो निरपराधिबलिध्वंसि बभूवेति तुच्छमेव तस्मादीषन्मन इवासीदित्यर्थान्तरमप्यूह्यम् । [५८]

यद्वा आसमन्तान्मन्यते जानातीत्यामनः "यः सर्वज्ञः स सर्ववित्" "सर्वमात्मैवाभूत्" इतिश्रुतेः । एतादृशो विभुरपि कार्यवशाद्वामनः खर्वो जातः ! मनधातुः पचाद्यजन्तः । एतेन महान्तोऽपि कार्यवशात्तुच्छा भवन्ति इत्यर्थं बोधयितुं वामनावतार इति तात्पर्यम् ।

महान्तोऽपि भवन्तीह तुच्छा वै कार्यगौरवात् ।
बोधयन्नेतमेवार्थं भूमापि तुच्छतां गतः ॥ [५९]

यद्वा वा अ आम् अनः इतिच्छेदः । वा इवार्थः । अकारो वासुदेवस्तत्सम्बोधनम् । आः ब्रह्मा "आकारश्च पितामह" इति कोशात् । अमन्तः । अनः शकटम् । एवं च हेवासुदेव ! ब्रह्माणं शकटमिव करोषि । यथा शकटं धुरं वहति, एवं सृष्टिधुरवाहकं ब्रह्माणं करोषि । अतो वामनःशब्दो भगवति वासुदेवे प्रयुज्यत इति तात्पर्यम् । अपदेन वासुदेवबोधकेन त्रिविक्रमाव-

तारस्य सर्वान्तर्यामित्वं प्रतिपादितम् "यो ब्रह्माणं विदधाति" इत्याद्युपनिषच्च प्रदर्शिता ।

शकटो हि यथा भारं ब्रह्मेश्वरनियोगतः ।
वहते सृष्टिभारं वै श्रुतिर्ब्रूते तथा बहुः ॥ [६०]

यद्वा आमित्यङ्गीकारेऽपि । एवं च सर्वान्तर्यामिणा भगवता ब्रह्मापि सृष्टिभारवहने अन इव नियुज्यते इति स्वीकुर्मः पूर्वोक्तश्रुतिप्रतिपादनादिति भावः । पूर्वश्लोकेन गतार्थः ॥ [६१]

यद्वा अवेत्युपसर्गसमानाकारं पूर्वपदमस्तु । ततः परम् अ इति च्छेदः । अ इवाचरतु इत्यर्थे "सर्वप्रातिपदिकेभ्यः" इति क्विबन्तो लोण्मध्यमपुरुषैकवचनान्तः । ततः परम् अ इति च्छेदः । स च वासुदेवसम्बोधनार्थः । म नः इतिच्छेदः । तथा च हेवासुदेव ! हेसर्वान्तर्यामिन् ! वसुदेवपुत्र इवाचर ! मा लक्ष्मीर्यस्य सः मः । अर्श आद्यजन्तः सम्बोधनम् । "रुक्मिणी कृष्णजन्मनि" इत्युक्तेः । तथाच देवाः क्षीरशायिनारायणं वामनःपदेन स्तुवन्ति नोऽस्माकमुपरि कृपामादधानः सर्वान्तर्यामी भवाँल्लक्ष्मीसहितः सन्वसुदेवपुत्र इवाचर । नहि सर्वान्तर्यामी कस्यापि पुत्रो भवितुमर्हः । योनिसम्बन्धस्यातीव गर्ह्यत्वात् । एतद्बोधनायावोपसर्गः । अवोपसर्गो निन्दार्थकः "अवज्ञावहेलनम्" इत्यादौ यथा । अस्मत्कृपयैव तदपि स्वीकृत्य लक्ष्मीमादाय वसुदेवपुत्र इव भवेति ब्रह्मादिप्रार्थना । एतद्बोधनाय वामनःपदं प्रयुञ्जते इति सर्वमनवद्यम् । भागुरिमतेऽकारलोपः (१) ।

---

(१) अवोपसर्गो निन्दार्थकः । अवज्ञावहेलनमित्यादौ यथा । यद्यपि क्रियायोगाभावादुपसर्गत्वं नास्ति तथाप्यर्थसौन्दर्यबलादुपसर्गसमानाकारत्वमाश्रित्य लोपः । राजवद्राजपुरोहित इतिवत् शाविसंज्ञामाश्रित्य वा ।

देवास्तुष्टुविरे देवं क्षीरशायिनमच्युतम् ।
गृहाण भगवन् ! जन्म वसुदेवात्मजो भव ॥ [६२]

यद्वा वा अ. मनः इति च्छेदः। अ इति वासुदेवसम्बोधनम्। मन्यते सर्वाञ्जानातीति मनः । मनज्ञाने पचाद्यजन्तः । वाविकल्पार्थः। हेवासुदेव! भवान् ज्ञानाश्रय इति "महेश्वरेऽष्टौ" इतितार्किकमतम् । वेदान्तिनस्तु "अपाणिपादो जवनो ग्रहीता" इत्यादिना मनःसम्बन्धं निषेधयन्तो ज्ञानाश्रयत्वमपि निषेधयन्ति "येन वागभ्युद्यत" इत्यादिना मनोऽधिष्ठातृत्वं प्रतिपादयन्तश्चित्स्वरूपमेव प्रतिपादयन्ति । पक्षद्वयबोधनायैव वापदम् ।

आत्मा ज्ञानाश्रय इति तार्किकाणां मतं स्फुटम् ।
सच्चिदानन्दरूपोऽयमिति वेदान्तडिण्डिमः ॥ [६३]

यद्वा वा अ आम् अनः इतिच्छेदः। अ इति पूर्ववद्धेवासुदेव ! आं ब्रह्माणं अनः जीवयामासिथ । अनप्राणने लङि मध्यमपुरुषैकवचनान्तः। (१)आर्ष आडभावः। अन्तर्भावितण्यर्थोऽपि तथैव। ब्रह्माणं हन्तुं प्रवृत्तौ मधुकैटभौ निघ्नन् ररक्षिथ अतो मधुसूदननामासीतिभावः ।अवधारणार्थो वाशब्दः। "तुपुनर्वैवत्" इत्यमरः।

ब्रह्माणमुद्यतौ हन्तुं मधुकैटभसंज्ञकौ ।
हत्वा हरी ररक्षादौ नाम्नासीन्मधुसूदनः ॥ [६४]

यद्वा वा अ आम् अनः इतिच्छेदः । अ इति पूर्ववत् । आमित्यङ्गीकारे । अनिति जीवतीति। अनप्राणने पचाद्यजन्तोऽनः। तथाच हेवासुदेव ! भवानेव अनः जीवति । एतदाम् सर्वश्रुतिस्मृतिपुराणानि स्वीकुर्वन्ति । "यतो वा" इत्यादिना भवानेव शि-

(१) बहुलं छन्दस्यमाङ्योगेऽपीति आण्निषेधः । छन्दस्त्वं चार्षत्वम् । अतो गृभीतगुणामित्यत्र हग्रहोर्भश्छन्दसीति भत्वमिति दिक् ।

ष्यते इति प्रतिपादितम् । "योऽवशिष्येत सोऽस्म्यहम्" इत्यादिना च । भगवन्तमृते सर्वे म्रियन्त इति स्पष्टमेव ।

अजो भवान्यतो नित्यो म्रियते नो अहो अमुम् ॥
महिमानं श्रुतिर्ब्रूते केऽपि जानन्ति न प्रभो ! ॥ [६५]

यद्वा वाम अ इति छेदः । "अभावे नह्यनोनापि" इत्यमरः । शकन्ध्वादित्वात्पररूपमार्षम् । न इति पृथक् । वामपदं शोभनार्थकं सम्बोधनम् । तथाच नः अस्माकम् लोकानां वामं सुन्दरम् अ नास्ति यस्मादितिबहुव्रीहिः । यं वामनमपेक्ष्य लोकेषु लावण्याधिको नास्तीति भगवन्तं भक्ताः सम्बोधयन्ति "श्यामसुन्दर ते दास्यः" "बिभ्रद्वपुः सकलसुन्दरसन्निवेशम्" इत्यादिना बाह्यास्तु यथावेषं पश्यन्तः, प्राकृतास्तादृशं खर्वरूपं पश्यन्तः अस्मादन्यो दुष्टो दर्शनानर्होऽसुन्दरः पदार्थो नास्ति अस्माकमिति सम्बोधयन्ति । द्विपञ्चाशदङ्गुलिप्रमाणोऽयं वामनो न दर्शनार्ह इति तेषां तात्पर्यम् । "वामः शोभनदुष्टयोः" इतिकोषबलादमू अर्थौ लभ्येते ।

नास्त्यस्माच्छोभनं किञ्चिद्देवास्तं जगदुस्तदा ।
दैत्यास्तु दर्शनानर्हो दुष्टोऽसौ वामनः खलु(१) ॥ [६६]

यद्वा वामः उमानाथः । स च उकाररूपः । वाच्यवाचकयोरभेदात् । वामशब्दान्तर्गते अपदापदे वासुदेवब्रह्मपरे(२) मकारोऽपि तदन्तर्गतः नादोपलक्षको विसर्गः । तथाचोङ्कारोऽपि वामनपदान्तर्गतः । अत्रायं विचारः । मास्तु वाऽभेदोपचारः । उश्च अश्च आश्च म् चेतिसमाहारः । उकारस्य यण । वकारः अका·

(१) यस्माद्यावर्न्तरं नास्ति तस्माद्वामं जगुर्बुधाः । प्राकृतास्तु·नदृश्योऽयं दुष्टो ह्रस्वो विनिन्दितः । इति वा ।

(२) वामशब्दान्तर्गतावकाराकारौ वासुदेवब्रह्मपराविति पाठः स्पष्टार्थः ।

शकारयोर्दीर्घः । वकारश्चाकारेण युज्यते, एवं च वामितिपदम् । ततः परम् अ इति वासुदेवसम्बोधनम् । नः इति षष्ठीवहुवचनान्तम् । अ ! हेवासुदेव ! नोऽस्माकं भवान् वाम् ओङ्काररूपः "ॐ मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । स याति ब्रह्मणः स्थानम्" इत्यादिभगवदुक्तोङ्कारस्य महामहिमा स भवान्वासुदेव एवास्माकम् । एवम्—

ॐङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकाविमौ ॥

इत्युपनिषदा च मङ्गलस्वरूपप्रतिपादनात्तदपि भवानेवेति भक्ताशयः । अवतेष्टिलोपश्चेति साधुः । ओमित्यङ्गीकारे ब्रह्मणि च । स्वरादिपाठादव्ययत्वम् । एवमेव वांशब्दस्याप्यव्ययत्वमुचितम् "ओमेवं परमं मते" इत्यमरः । "ओमित्यनुमते प्रोक्तं प्रणवे चाप्युपक्रमे" इति विश्वः । वासुदेव एव ब्रह्मेति ओं स्वीकुर्म इति च भक्ताशयः । उः शिवः, शेते अस्मिन् जगदिति शिवः । "सर्वनिघृष्व" इत्यौणादिकसूत्रेण साधुः । ब्रह्मण्येव जगल्लयः । ओंपदान्तर्गतोऽपि उशब्दो ब्रह्मपर एव । ब्रह्मरूपिणः शिवस्य गावः प्रियतमाः यदर्थं लाञ्छनलाञ्छिता उज्झिताः सुखं चरन्ति, ब्रह्मबोधकं वाम् इति शब्दमेवोच्चरन्ति न तु शब्दान्तरम् । अत एव नन्दी शिवस्य प्रियतमो वाहनीभूय पुरस्तिष्ठति । वाम्पदोङ्कारपदयोरनर्थान्तरतया शिवसन्निधौ तद्भक्ता वां जय महादेवेति शब्दमुच्चैरुच्चरन्ति । केचन तु वमिति समानमेव(१) । केचित्तु जगशिव ओङ्कारा ब्रह्माविष्णुमहेश्वर(२) इत्यादि गायन्ति । त-

(१) वंपदेऽपि उकाराकारमकाराणामन्तर्भावात् ।

(२) क्रमादृते यथा गायन्ति तद्वत् वांशब्देऽपि क्रमो न विवक्षितः । आकारेणैव पितामहबोधे मकारो नादोपलक्षकोऽस्तु।आ एव म

स्मादनर्थान्तरावित्रमौ ।

ओङ्कारोऽन्तर्गतो यस्मिन्वामनः कथ्यते बुधैः ।
उकारादापरे यस्मिन्यणा रूपं च सिद्ध्यति ॥ [६७]

यद्वा वा आम नः इति च्छेदः । वा एवार्थः आकार अभिविधौ । तथाच आसमन्तात् लक्ष्मीर्यस्य स आमः तत्सम्बुद्धौ हे आम ! परिपूर्णलक्ष्मीक ! भवान् नः दरिद्राणां दीनानामस्माकमेवानुगृह्णाति न तु धनिकानामिति शेषः ।

यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ।
निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः ॥
तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे ! ।

इत्यादिना निष्किञ्चनत्वस्यैव वैराग्योत्पादनद्वारा मोक्षसाधनत्वस्य मुहुर्मुहुर्भगवता प्रतिपादनादितिभावः ।

निष्किञ्चनानां भगवान्वामनः शरणं सदा ।
यतो वै रुक्मिणीं स्माह निष्किञ्चनजनप्रियः ॥ [६८]

यद्वा निःस्वं प्रति सम्पन्नलक्ष्मीको ब्रूते । अस्मिन्पक्षे अम इतिच्छेदः । हेनिःस्व । नः अस्माकमेव विभववतामेव वामनः अनुगृह्णाति तस्मा अपि विभवो रोचते यतो व्याजेन बलिसर्वस्वं

इति कर्मधारयोऽस्तु वा । "अकारो वासुदेवः स्यादाकारश्च पितामहः । मः शिवश्चन्द्रमा वेधा" इतिकोशः । उः शम्भुः । नादबिन्दुकलावान् षडक्षरोऽयं मन्त्रराजो वांशब्दान्तर्गतः । अमृतरूपश्चन्द्रस्तदाकारवान् बिन्दुः । बिन्दुश्च कलानादयोरुपलक्षकः ।

ओङ्कारो गुणबीजं प्रणवस्तारो ध्रुवश्च वेदादिः ।
आदिरुमध्यो मपरो नामान्यस्य त्रिमात्रिकश्च तथा ॥

इत्याचार्याः । षडक्षररामममन्त्रे इव वामनःशब्देऽपि ओङ्कारान्तर्भाव इति विचार्यम् । रामपदेऽपि क्रमं विना तारकान्तर्भावः । छान्दसत्वान्नात्र विवादः कर्त्तव्यः ।

जहार । अहो विभवमहिमा मिषेण तत्सर्वस्वमादायापि पुनस्तत्सम्पद्रक्षायै स्वयं प्रतीहारोऽपि बभूव। यदि दरिद्रं प्रति लक्ष्मीपतिः प्रसन्नो भवेत्तर्हि कथं तव दारिद्र्यं "निःस्वं त्यजन्ति गणिकाः" इत्यादिनापि दारिद्र्यस्यातीवगर्ह्यत्वादित्यादि तयोरुक्तिप्रत्युक्ती ।

अहो धनस्य महिमा यदर्थं वामनो विभुः ।
बलिध्वंसी बभूवाथ तस्यैव द्वारपोऽभवत् ॥ [६९]

यद्वा ईषल्लक्ष्मीकं प्रति सम्पन्नलक्ष्मीकस्योक्तिः । पूर्वश्लोकेन गतार्थः ॥ [७०]

यद्वा हेवाप ! भवान् वामनोऽसि वामननामा दिग्गज एवासि "वामनः कुमुदोऽञ्जनः" इत्यमरः । एतेनास्मदाद्यपेक्षया उत्कर्षो ध्वन्यते । "सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ।" इत्यमरः(१) ।

वामनो दिग्गजः प्रोक्तो भवानस्माकमेव च ।
यस्य निःश्वासतो वायुः प्रादुर्भवति सर्वतः ॥ [७१]

यद्वा वामा सुन्दरा नासिका यस्य स वामनाः तत्सम्बुद्धौ हेवामनः ! प्रभृतिग्रहणस्य प्रकारार्थत्वान्नासिकाया नस् ।अ-

---

(१) यदि तु अनुत्तरपदस्य कथं श्रेष्ठार्थवाचकत्वमित्युच्यते तर्हि सिंहो माणवक इतिवत् गौणलाक्षणिक एवास्तु । शक्यार्थवृत्तिगुणवत्त्वप्रयुक्तप्रवृत्तिनिमित्तारोपेणार्थान्तरे प्रयुक्तत्वं तत्त्वमित्यवेहि । यद्वा "विनापि"इति लुप्तं वटुपदमादाय वटुश्चासौ वामनः इति कर्मधारये तस्योत्तरपदत्वमक्षतमेव । यद्वा वामन इव वटुर्वटुवामन इति उपमितसमासोऽस्तु । यद्वा वाचकलुप्तोपमास्तु । हेवाम ! हेसुन्दर ! त्वं नः भक्तानां वामन इव दिग्गज इवेत्यर्थोऽस्तु । यद्वा वामे धर्मिणि वामननामकदिग्गजस्वरूपत्वमुत्प्रेक्ष्यते सन्देहसङ्करः । दिग्गजनिःश्वासा एव मारुता इति ब्रह्मवैवर्त्तः ।

च् तु न असंज्ञात्वात् । यौगिकोऽयं वामनःशब्दः । एवं च स-वामनः इति श्लोके तच्छब्दस्य (१)भूतानुभूतार्थवाचकत्वाद्वरा-हाद्यवतारे ह्रुणसोऽपि भगवान्वामनावतारे अतीवसुन्दरनासि-को जातः । अतः सर्वे हेवामनः इति सम्बोधयन्ति । सम्बोधन-मन्तरा तु दीर्घाभाव आर्षः । तं वामनमित्यकारान्तपाठे तु अर्था-न्तरपरतया व्याख्येयम् । भगवान् भक्तानुग्रहार्थमेव च्छलीति तु समुदायार्थः ।

अतीवसुन्दरं दृष्ट्वा नासिकां यस्य देवताः ।
वामनस्तं तु सम्बोध्य प्रोचुरस्मात्सवामनः ॥ [७२]

यद्वा वा एवार्थः मन इति पृथक् "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इत्युक्तेर्मनः कल्पितमेव सर्वं न तु वा-स्तवमित्यर्थः । एतेन विज्ञानवादोऽपि प्रदर्शितः ।

विज्ञानवादिबौद्धास्तु जहतो बाह्यवस्तुनि(२) ।
सर्वं विज्ञानमेवाहुर्विज्ञानान्नास्ति किञ्चन ॥ [७३]

यद्वा एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वेन वामनः-पदश्रवणानन्तरं बलिस्मरणं ततोऽपि विन्ध्यावलिस्मरणम् । तस्माद्विन्ध्यावलेरपि परमभाग्यं सूचितम् । "विनापि"इत्यादिना विन्ध्यापदलोपान्नामैकदेशन्यायाद्वा तस्या अपि बोधात् । साहि गङ्गाजलपूर्णं भृङ्गारं धृतवती सती श्रीवामनपादाववनिनेज लो-कपावनीस्तदपः शिरसाऽवहत् । अतो लोकोऽपि तदेव मङ्गलं स्मरन् विवाहे वरवध्वोः पादधावनसमये'सुनकेशरिमे गङ्गाजलपा-

(१) इदमः प्रत्यक्षगतं समीपतरवर्त्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ।

(२) बाह्यं वस्तु यस्मिन् ज्ञाने । सप्तम्यर्थो विषयत्वम् । बाह्य-वस्तुविषयकज्ञाने बाह्यवस्तु नितरां जहत इत्यर्थः ।

नी' इत्यादि गायन्ति । अत्रेदं रहस्यम् । तथाहि "अर्चित्वोदकपूर्वकम्" इत्येव दृश्यते । हस्ते कुशादिकं दद्यावेतत्तु नैव दृश्यते। अतः प्रतिग्रहीतुस्तेजोबलादिक्षयं स्मरन् वामनश्छली नैव हस्तेन दानं जग्राह । स्वहस्तमधःकृत्वा ईश्वरो दानवहस्ताद्दानं कुतो गृह्णीयाद्ग्रहणे तु तेजो नश्येत्तन्नाशे तु यदर्थमवततार तदेव निष्फलं भवेन्नहि निस्तेजा वामनस्त्रिलोकीं व्याप्नुयात् । अतो-

दानपात्रं समुद्दिश्य जलमध्ये जलं क्षिपेत् ।
दाता तत्फलमाप्नोति ग्रहीता नोपलिप्यते ॥

इति वचः पठन् बलिं बोधयित्वा कुशादिकं जल एवोत्सर्जयामास इति मन्ये ।

एकसम्बन्धिविज्ञानादपरस्यापि जायते ।
सम्बन्धिनः स्मृतिस्तस्माद्विन्ध्यावलिविधिस्मृतिः॥[७४]

यद्वा वाम नः इतिच्छेदः । हेवाममार्गावलम्बिन् ! नः अस्माकं सनातनधर्मावलम्बिनां मध्ये त्वं वामनः ह्रस्वो नीच इति यावत् । सनातनं स्वधर्मं विहाय परधर्मावलम्बी नरकार्हो नीच एव भवति, "स्वधर्मे निधनं श्रेय" इति भगवदुक्तेरितिभावः । वाममार्गावलम्बिनं सम्बोध्य सनातनधर्मावलम्बी तं निन्दति । न इति निर्धारणषष्ठी । अपादानत्वस्य सम्बन्धत्वेन विवक्षायां वा षष्ठी । अस्मदाद्यपेक्षयेत्यर्थः ।

वाममार्गिणमुद्दिश्य सनातनवतां वचः ।
वयं मान्याः स्वधर्मार्हा निन्द्या उत्पथगामिनः ॥ [७५]

यद्वा सनातनधर्मावलम्बिनं प्रति असूयया वाममार्गावलम्बिनामुक्तिः । एतत्पक्षे हेवाम ! हेदुष्ट ! प्रतीपेति वामपदार्थः । पूर्वश्लोकस्य वैपरीत्येन पाठः ॥ [७६]

यद्वा वाशब्दो विकल्पार्थः । स चानेकत्वपरः । तथाचानेकाः

पञ्चविधो मकारो मांसमत्स्यादयो यस्य तत्सम्बुद्धौ हेवाम ! नोऽस्माकं मध्ये त्वं वामनो नीचोऽसि । श्रुतिपथं विहाय पञ्चविधमकारमार्गपरस्य नीचत्वमेव । तन्मार्गावलम्बिनो नहि तत्त्वमसीतिमहावाक्यबोधितजीवब्रह्मैकत्वबुद्धिरुदेति । अतस्त्वं नीच इत्यभिप्रायः ।

मत्स्यादयः पञ्चविधा येषामिष्टफलप्रदाः ॥
तान्प्रति ज्ञानिनामुक्तिर्नास्ति मुक्तिर्भवादृशाम् ॥ [७७]

यद्वा पूर्वं वा अम इतिच्छेदः । न विद्यते मा सम्पत् यस्य सः तत्सम्बुद्धौ । हेनः ! हेपुमन् ! त्वं वामनः नीच इति यावत् । सम्पद्रहितस्य नीचैस्त्वं लोके ख्यातमेव ।

पण्डितोऽपि दरिद्रः स्याद्यदि, निन्द्यो भवेज्जने ।
ते सर्वे धनवृद्धस्य द्वारि तिष्ठन्ति किङ्कराः ॥ [७८]

यद्वा हेवाम ! वाममार्गपर ! अम ! दरिद्र ! हेनः ! त्वं वामनः नीच इतियावत् । पूर्वश्लोकेन गतार्थः ॥ [७९]

यद्वा नास्ति मा यस्मात्सः अमः तत्सम्बुद्धिः । वाममार्गपराणां कलिप्रभावान्निरवधिः सम्पद्भवति तथापि त्वं वामनो नीच एव । कथमेतादृशसम्पत्सम्पन्नस्य नीचैस्त्वमिति चेत् । अ अम इतिच्छेदः । अस्य वासुदेवस्य मा मोक्षलक्ष्मीः सा नास्ति यस्य(१) सः आमस्तत्सम्बुद्धिः ! अकारद्वयस्य दीर्घे आमेतिसिद्धिः । ननु पूर्वस्य निपातत्वे प्रकृतिभावाद्रूपासिद्धिरिति चेत्, सत्यम् । तस्माद्वकारोत्तराकारेण सह दीर्घे पुनः अमशब्दाकारेण दीर्घे रूपसिद्धेः । यद्वा प्रकरणबलादेव सामान्यसम्पद्वाचकमाशब्दस्य मोक्षलक्ष्मीपरत्वं वक्तुं शक्यमिति मास्तु पूर्वोऽकारः । किं बहुना । पूर्वोऽकारो वासुदेववाचको न निपातः । ततः प-

(१) निषेधार्थाशब्देन समासः ।

रोऽकारो निपातः । अनयोर्दीर्घस्तु स्यादेव । अचिग्रहणबलाद्यद-
च्निमित्तकप्रकृतिभावस्तन्निमित्तकस्यैव सन्धिकार्यस्य निषेधा-
न्न शङ्कालेशोऽपीति विचार्यम्(१) ।

नीचप्रवणता लक्ष्मीर्जलजायास्तवोचिता ।
तथापि मोक्षलक्ष्मीर्नो तेषां संसारलक्षणम् ॥ [८०]

यद्वा एवमेव पञ्चमकारपक्षेऽपि योजनीयम् ; पूर्वश्लोकेन गतार्थः ॥ [८१]

यद्वा हेवाम ! हेवा ! मार्गारूढप हेनः हेपुमन ! त्वं हेवाम इति वामपदेन सम्बोध्योऽसि । कुतः इतिचेत् वामा वनिता यस्य सः तत्सम्बुद्धिर्हेवाम ! इति अर्शआद्यजन्तो वामशब्दः । स चाच् नित्ययोगे । तेन वामासम्बन्धो नित्य एव तवास्ति । अन्यथा कर्पूरादिदिस्तोत्रोक्तानुष्ठानानुपपत्तेः ।

वामां विहाय तेषां तु नास्ति साधनमाह हि ।
कर्पूरस्तोत्रमित्याहुस्तोत्रपाठरता बुधाः ॥ [८२]

यद्वा एतत्पक्षेऽपि ७८ पक्षे इव सर्वं योजनीयम् । पूर्वश्लो-केन गतार्थः ॥ [८३]

यद्वा वामशब्दो वाममार्गिणं पञ्चविधमकारपरं चाह । स एव प्रतिकूलमप्याह । कोशस्तूक्त एव । अतो योगिनामस्माकं त्वं प्रतिकूल एव । यतः "सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः" इत्यादि । वामासङ्गिनः मोक्षमार्गपराणां प्रतिकूला इतिध्वनिः ।

योगिनां प्रतिकूलास्ते वाममार्गरता नराः ।

---

(१) अस्मिन्पक्षे अस्य वासुदेवस्य अ नास्ति मा मोक्षलक्ष्मीर्य-स्येति विग्रहः । पश्चादकार एव निपातः ।

योषितो नरकद्वारं(१) नदृश्याः सुखदाः कुतः ॥ [८१]

यद्वा वाममार्गोऽपि बुद्धावान्तरभेदः । तेषां दशबलप्रोक्ताः यथाहुः—

दानं शीलं क्षमा वीर्यं ध्यानं प्रज्ञाबलानि च ।
उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि च ॥ इति ।

तथाच हेवाम ! वाममार्गावलम्बिन् हेशोभन ! त्वम् अमनः मनोभिन्न इवाभासि । वा इवार्थः । यस्य तव प्रज्ञा एव बलं सा हि निश्चयात्मिका "बुद्ध्या यया धारयते मनः प्राणेन्द्रियक्रियाः" इत्यादिना श्रीभगवता सर्वेन्द्रियाणां बुद्धिरेवाधिष्टात्री न तु मनोऽधिष्टातृ इत्युक्तत्वात् । सैव तव बलम् । यथा मनश्चञ्चलं तथा त्वं न अहो तव धैर्यमितिभावः । आर्हतः क्षपणो नग्नः श्रमणो जीवको मलिः । इति बुद्धभेदाः ।

बुद्धिमन्तस्तु बुद्धा ये तेषां दशबलानि च ।
अहिंसैव महाधर्मो धर्मिभ्यो वो नमोनमः ॥ [८२]

यद्वा हेवाम ! हेवल्गो ! हेप्रतीप ! त्वं नः बुद्धोऽसि अतः अम सम्भक्तिं कुरु, वा अथवा नोऽस्माकं अम शब्दं कुरु । शब्दपदेन शब्दब्रह्म लक्ष्यते वेदो वा "वामौ वल्गुप्रतीपौ द्वौ" इत्यमरः । "नकारः सौगते बुद्धौ" इतिकोशः । अयं भावः । दानादिदशबलत्वाच्छोभनोऽसि कर्मकाण्डविमुखत्वाद्वेदमार्गपराणामस्माकं प्रतिकूलोऽसि यतस्त्वं बुद्धः सम्भक्तिं भजनं कुरु तस्मादपि मोक्षावाप्तिर्भवति । यद्वा वयामिव वेदोक्तकर्ममार्गपरो भव(२) इति

(१) अतिव्यवायशीलो यो न च वाजिक्रियारतः ।
ध्वजभङ्गमवाप्नोति तच्छुक्रक्षयहेतुकः ॥

(२) कर्मणैवहि संसिद्धिमास्थिता जनकादयः । इतिस्मृतेः बुद्धोपासकानां युष्माकं बौद्धानां तु पुरुषतत्त्वानभिज्ञानां वैराग्यमात्रात्प्रकृतिलयः श्रूयते न तु मोक्षाप्तिरितिभावः ।

बुद्धं प्रति कर्मणि उक्तिः । अमगत्यादौ लोडन्तमध्यमपुरुषैकव-
चनान्तः ।

कर्ममार्गपरः कश्चित् विघ्नकारी शठः पुमान् ।
भक्तिं वा कुरु कर्म त्वं कर्मणो मुक्तिरेव च ॥ [८३]

यद्वा आमेति छेदः । अं वासुदेवममति सम्यग्भजतीत्यामःतत्सम्बुद्धिः । हेआम ! अण्णन्तोऽयममधातुरकारपूर्वः । अतो हेवाम!शोभन! नोऽस्माकं पश्वालम्भनेन तुच्छस्वर्गसुखाभिलाषिणां दयाशून्यानां मध्ये त्वं सुन्दरोऽसि । प्रतिकूलोऽसि वा 'अहिंसा परमो धर्म' इति तव मतमेव चारुतरम् । अतः आम परमानन्दस्वरूपं प्रति गच्छेतितात्पर्यम् । आङ्पूर्वोऽमधातुर्लोण्मध्यमपुरुषैकवचनान्तः ।

कर्मणः क्षीणतां बुद्धा ज्ञानमार्गोन्मुखस्य वै ।
इदं वचो महद्विद्धि ज्ञानं मोक्षस्य साधनम् ॥ [८४]

यद्वा वा अ अमेतिच्छेदः । नः इतिच्छेदः । वाविकल्पार्थः अ सम्बोधनार्थः । बुद्धवाचकनपदसन्निधानाद्बुद्धस्यैव सम्बोधनम् । तथा च अ हेबुद्ध ! त्वं नः बुद्धोऽसि अम गच्छ वा अथवा तिष्ठ अस्माकं प्रतिकूलोऽसि अतो वामपदेन सम्बोध्योऽसि यथेच्छं कुरु इति तात्पर्यम् ।

बुद्धस्त्वं दर्शनानर्हः प्रतिकूलेऽसि मादृशाम् ।
गच्छ वा तिष्ठ वा यस्मिन्निच्छातेऽस्ति तथा कुरु॥[८५]

यद्वा वामेतिच्छेदः । हेवाम हेउमानाथ ! नः अस्मान् अम जानीहि । अमगत्यादौ लोण्मध्यमपुरुषैकवचनान्तः । गत्यर्थस्य ज्ञानार्थत्वम् । असौ दुःखसागरमग्नो दीनतरः, असाबुद्धर्तुं मया योऽय इति विचार्य अस्मानुद्धरेतिभावः । "वाम उमानाथ" इतिहैमः ।

दुःखसागरमग्नं मां जानीहि भक्तवत्सल ! ।
उमानाथ! दयासिन्धो ! दुःखसिन्धोः समुद्धर ॥ [८६]

यद्वा शब्दसम्भक्तिपरत्वे हेउमानाथ ! अस्मान् अम आह्वय अतो भवत्सन्निहितो भविष्यामि अद्य तु भवद्दूरीकृत इति भावः॥

भवद्दूरीकृतं भक्तं भवानाह्वयते यदा ।
तदोमानाथ ! भगवन्सान्निधिस्ते भविष्यति ॥ [८७]

यद्वा हेउमानाथ नोऽस्मान्भक्तान् अम भज । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । भगवान्भक्तभक्तिमान्" इत्युक्तः। यथा भक्तो भगवन्तं भजति तथैव भगवतापि अहं भक्तो भजनीय इत्यभिप्रायः ।

भवता भजनीयोऽहं यथा त्वं भक्तवत्सलः ।
मया, भवद्वचो मानं ये यथेत्यादिकं स्मर ॥ [८८]

यद्वा वाम हेवामदेव ! देवपदलोपो द्रष्टव्यः । नामैकदेशन्यायाद्वा ।

नामैकदेशे नाम्नोऽपि ग्रहणं दृश्यतेऽथवा ।
वामशब्दो वामदेवमाह लोपोऽस्ति तं स्मर ॥ [८९]

यद्वा वामा वनिता उमा वामाङ्गभूता यस्येति अर्शआद्यचा नित्यसम्बन्धं बोधयता अर्द्धनारीश्वरः प्रतिपादितः। शेषं पूर्ववत्।

अर्शआद्यज्बलाद्वामपदमाह सदा भवान् ।
भवानीयुग्यतः शास्त्रेऽर्द्धनारीश्वरमाह हि ॥ [९०]

यद्वा अमरोगे आङ्पूर्वः घञन्तः सम्बोधनान्तः । तत्पूर्वमकारः प्रश्लिष्यते । दीर्घेण रूपं साधु । तथाच आम इतिच्छेदः पश्चाद्वाम इति च्छित्वा अर्थो योजनीयः । अ न विद्यते आम ईषद्रोगो यस्य सः तत्सम्बोधनम्। मृत्युञ्जयत्वान्महेश्वरे रोगो नैवेषदपि अस्ति यतः अतो हेवाम ! अतीव सुन्दर ! नोऽस्मान् अम पूर्ववत् ।

त्वयि रोगो यतो नास्ति ततो मृत्युञ्जयोऽसि वै।
अतो रोगिण इत्थं त्वां पूजयन्ति सदाशिव!॥ [९१]

यद्वा! अ न विद्यते मा सम्पद्यस्य सः अमः तत्संबुद्धौ हेदरिद्र! दरिद्रलक्ष्म दधासि तथापि वाम! अतीवसुन्दर! शेषं पूर्ववत्।

ईश्वरोऽसि भवान् शम्भो! यस्य मित्रं धनाधिपः।
सोऽपि दारिद्र्यलक्ष्मा चेद्विधेः को लङ्घने प्रभुः॥ [९२]

यद्वा वाशब्दो विकल्पार्थः। नोऽस्मान् अम आह्वयेत्यादिपूर्ववत्। वाशब्देन विकल्पार्थेन माऽऽह्वय उमानाथस्य सर्वज्ञत्वात्। सर्वभक्तक्लेशं जानाति अतः स्वयं रक्षिष्यतीत्याशयः।

सर्वज्ञोऽसि भवान्देव! भक्तदुःखं हनिष्यसि।
भक्तान्माऽऽह्वय सर्वज्ञ! किं ब्रूमः क्षमयस्व माम्॥[९३]

यद्वा हेवाम! हेदुष्ट! अ अम मा आह्वय दुष्टभाषणात्त्वत्कृतं पापमपि मयि पतेत्। सत्सङ्ग एव वरिष्ठः दुष्टसङ्गस्तु विगर्हितः इति दुष्टं प्रति सदुक्तिः।

हेदुष्ट! मां माह्वय वा निन्द्यं वै दुष्टभाषणम्।
सङ्गतस्त्वत्कृतं पापं मय्यपि प्रविशद्ध्रुवम्॥ [९४]

यद्वा वामन् अ इति च्छेदः। वाति सर्वत्र गच्छति इति वामा तत्सम्बुद्धिः। वाधातोर्मनिन्। हेसर्वत्रग! अतो भवान् अः वासुदेवः वासुदेवपदार्थः स एव। अत एव वामनः इति पदवाच्योऽसि न तु खर्वत्वात्। नहि खर्वो भूमा भवतीत्याशयः।

वाधातोर्मनिनन्तस्य सम्बुद्धौ जायते स्मर।
वामन्निति पदं भूमा कथं ह्रस्वो भवेद्वद॥ [९५]

यद्वा गन्धनार्थकादेव तस्मान्मनिन्भवतु हेसूचक! भवान् अः वासुदेवः। वासुदेवो हि द्वारकामधिवसन् पैशुन्यं कुर्वन् जविष्ठं कालिं कौरवेषु जनयन् भुवो भारमवातारयत्। अतो वामनः इति

पदवाच्यो जातः ।

गन्धनार्थकवाधातोर्मनिनापि तु तद्भवेत् ।

द्वारकायां वसन्भूमा पैशून्यात्ताञ्जघान सः ॥ [९६]

यद्वा हेवाम ! अतिसुन्दर ! नः निषेधः नः अस्मान्प्रति अ आम् न अङ्गीकार्यः। अभावे अः। "अभावे नह्यनोनापि" इत्यमरः। शरणागतानस्मान् भवान्पातु भवान्भक्तवत्सलः। अतः अतीवसुन्दरोऽसि नहि रक्षामीति अङ्गीकारं विहाय भक्तान् रक्षेति भावः ।

नैव रक्षामि भक्तांस्त्वं निषेधं मा कुरु प्रभो ! ।

कस्याहं शरणं यायां रक्ष मां भवसागरात् ॥ [९७]

यद्वा हेवाम ! नः नशब्दानुकरणम् नशब्दानुकरणेन नशब्देनानुकार्यबोधितो निषेधो बोध्यते । तथाच नोऽयं वास्तविको वामनः अपि तु वामनानुकारी हरिरेवेति ध्वन्यते । इदमेवानुकरणफलम् । अन्यथानुकरणादपि अनुकार्यानुकरणयोर्भेदविवक्षायामर्थवत्सूत्रे विवक्षितशक्तिलक्षणान्यतरसम्बन्धज्ञानाधीनोपस्थितिप्रयोज्यस्वाविषयकशाब्दबोधजनकत्वप्रकारकतात्पर्यविशेष्यत्वसम्बन्धेनार्थवत्वात्प्रातिपदिकत्वे सुबुत्पत्तेर्नः इति साधुः । यथा प्राद्दृहोढेसादौ । भूसत्तायाम् अइउणित्यादौ तु अभेदविवक्षायां न स्वाद्युत्पत्तिः । जातायां तु तस्यां स्वस्मिन् स्वनिरूपिततादात्म्यभावेनाभेदविवक्षायां शक्तिलक्षणान्यतरसम्बन्धेनार्थवत्त्वाभावेन प्रातिपदिकत्वाभावात्सुबभाव इति तत्त्वम् । अतो विभक्त्युत्पत्तिः। असौ नो वामनः व्याजेनैव वामनदेहः त्वत्सर्वस्वापहरणायागतो विष्णुरेव । एनं त्रिपाद्भूमिं नैव प्रयच्छेति भार्गवनिषेधः औदार्यवता कृतवचसा बलिना आम् अङ्गीकारः अ न कृतः अपितु ददावेवेति वामनः इति पदाभिधेयोऽसीतिभावः । अस्मिन्पक्षे वामेति बलिसम्बोधनम् । भार्गवोक्तिः। हरिसम्बोधने

तु हेवाम ! हेदुष्ट ! हेप्रातिकूल ! वा त्वं नः वामनः इतिकल्पनीय इति विशेषः। अस्मिन्पक्षे पदच्छेदो दुष्कर इति नैव कृतः। अर्थानुरोधेन कर्त्तव्यः(१) एवमन्यत्रापि ।

नैव देहीति कविना निषेधेऽपि ददौ बलिः ।
वामनोऽसि भवान्देव ! त्रिविक्रम ! नमोऽस्तु ते ॥ [९८]

यद्वा हेवाम तत्रैव आम् ततः अन इतिच्छेदः (२)एन निषेधेन युक्तो नः निषेधः मुहुर्मुहुर्निषेधः आम् स्वीकृतः । अयं भावः । हेबटो ! वाम ! सुन्दर ! त्रिपादभूमिर्नैव त्वदीयवृत्त्यै अलं, वृत्तिकरीं भूमिं प्रयच्छामि इत्यादि बहुशः उक्तोऽपि बटुः असन्तुष्यतः स्वर्गादित्रिलोकराज्यमपि सन्तोषाय नालम् अतः त्रिपादभूमिमेव मह्यं प्रयच्छ, ततोऽधिकं न मह्यं रोचते इति निषेधं स्वीकृतवान् । अतो वामन इति पदप्रतिपाद्योऽसीतिभावः । पूर्ववदत्रापि निषेधो न वास्तवः । काकुपक्षे तु अधिकमेव रोचते इति लभ्यते ।

भूमिं वृत्तिकरीं तुभ्यं प्रयच्छामि बटो ! वद ।
बलिना प्रेरितो नैव नैवेति प्राह वामनः ॥ [९९]

यद्वा पूर्ववदत्रापि निषेधो न वास्तवः । अस्मिन्नेव पक्षे वा इति विकल्पार्थः पृथगस्तु। तथा च मुहुर्मुहुर्निषेध इव कृतो मुखेन परं तु त्रिपादभूमिं प्राप्य त्रिलोकीमेव व्याजेन सञ्जहार इति तात्पर्यम् ।

कृत्वा व्याजेन बहुशो निषेधं तां जहारह ।
त्रिलोकीं वामनः प्रोक्तो भूमा त्वं नैव वामनः ॥[१००]

---

(१) हेवाम इति च्छित्वा नः इतिच्छेदः। आम् अ इतिच्छेद इति बोध्यम् ।

(२) अनुकरणत्वेन निपातादपि विभक्तिः ।

यद्वा वामी अश्वा यस्यास्तीति अर्शआद्यजन्तो वामः तत्सम्बोधनं हेअश्व ! कुत इति चेत्, "उच्चैः श्रवसमश्वानाम्" इति त्वयैवोक्तेः । नोऽस्मान्पाहीतिशेषः । वाम्यश्वेत्यमरः ।

उच्चैःश्रवसमश्वानामित्युक्तेर्दर्शनात्तव ।

वामनोऽसि न खर्वत्वाद्रक्ष मां भवसागरात् ॥ [१०१]

यद्वा हयग्रीवावतारं वर्णयति ।

ब्रह्मयज्ञ प्रवृत्तस्त्वं जग्राह भगवन्स्मर ।

हयग्रीवां ततः प्राहुर्वामनं मे गतिर्भव ॥ [१०२]

यद्वा वामशब्दादेव तस्मादर्शआद्यचि अश्वाधिष्ठातृत्वेन प्रतिपादनात्कल्क्यवतारं स्तौतीतिभावः । अर्थभेदमादाय शैषिकादितिनिषेधाप्रवृत्तेः ।

प्रादुर्बभूव भगवान्म्लेच्छान हन्तुं कलौ यदा ।

तदा खड्गं गृहीत्वा त्वं हयारूढो हि वामनः ॥ [१०३]

यद्वा वाम् अ नः इतिच्छेदः वाधातोः क्विप् विच् वा । ततः षष्ठीबहुवचने आतोलोपः । वाम् गतिमतां चरजीवानां संसारिणां नः अस्माकं अ सुखं नास्ति ब्रह्मप्राप्तिर्नास्तीति भावः ।

संसारिणां सुखं नास्ति ब्रह्मप्राप्तिः कुतो भवेत् ।

दयालो ! पाहि मां भक्तं शरणागतपालक ! ॥ [१०४]

यद्वा पैशुन्यवताम् अस्माकं परलोकगतिर्नास्तीतिभावः ।

वाधातोर्गन्धनार्थस्य क्विप्विचोरामि वां भवेत् ।

सूचकानां गतिर्नास्ति परत्रेह च तं त्यज ॥ [१०५]

यद्वा अ वासुदेव ! तादृशानामस्माकं अ अभावः प्रस्तुतत्वाद्भवत्प्राप्तिर्नास्तीत्यभिप्रायः ।

वासुदेव ! भवत्प्राप्तिः सूचकानां कथं भवेत् ।

अस्माकं पाहि देवेश ! गतिस्त्वं भवसागरे ॥ [१०६]

यद्वा वा आम् अनः इतिच्छेदः । आं ब्रह्माणमिव नः अस्मान् हे अ वासुदेव ! पाहीतिशेषः। पितामहो भवन्नाभिकमलोत्पन्नत्वात्पुत्रः तं यथा रक्षसि तद्वच्छरणागतानां शरण्यो भवान् शरणागतानस्मान्पाहि । "यो वै ब्रह्माणं विदधाति" इत्यादिश्रुतौ शरणागतशरण्यप्रतिपादनादिति भावः ।

ब्रह्माणं सर्वदा सूनुमपास्त्वं भगवन् ! यथा ।
मामपीह भवान्पातु सुखी स्यां भवसागरे ॥ [१०७]

यद्वा नः अस्मानिव ब्रह्माणं पाहि । अयं भावः । हरये रोचते भक्तिरिति बहुशः प्रसिद्धर्भक्तिमतोऽस्मान् इव स्वपुत्रं ब्रह्माणं स्वभक्तिहीनमपि रक्ष । पिता हि स्वानुरागरहितमपि अपत्यं रक्षतीतिलोकप्रसिद्धिः ।

हरये रोचते भक्तिर्भक्तान्पाति ततो भवान् ।
स्नेहशून्यं यथा सूनुं पिता रक्षति रक्ष तम् ॥ [१०८]

यद्वा स्वारिशून्यस्य भवतः सर्वे उदासीना अभक्ताश्च रक्षणीया एवेति तात्पर्यम् ।

स्वारिशून्येन भवताऽभक्ता भक्ताश्च सूनुवत् ।
रक्षणीयाः सदा नोचेत्को वान्यः शरणं भवेत् ॥[१०९]

यद्वा निर्विण्णस्यावन्तिदेशनिवासिनो द्विजवरस्य मनः सम्बोध्य तत्प्रत्युक्तिः । वा अ मनः इतिच्छेदः । हेमनः सुखदुःखकारणमन्यत् अ नास्ति । वाविकल्पाः त्वत्कृता एव 'मन आपनन्ति' इत्यादि तत्रैव द्रष्टव्यम् ।

अवन्तिदेशे यः कश्चिदासीदाढ्यतमो द्विजः ।
निर्विण्णस्तस्य मनसि वच एतद्विनिश्चयः ॥ [११०]

यद्वा वा वायुः आः पितामहः मः चन्द्रः शिवो वा नः बुद्धो बुद्धिर्वा स्तुतिर्वा वृक्षो वा सूर्यो वा नेता वा

बन्धुर्वा एतत्सर्वं वामनो भगवान्विश्वरूपत्वात् 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति न्यायात् द्वैन्द्वैक्यम् । पुंस्त्वमार्षम् । लोकाश्रत्वाल्लिङ्गस्य वा ॥ [१११]

यद्वा वायुः पितामहः मनः इति बोध्यम् ।

उपादानस्य भवतः कार्यं सर्वं जगद्भवेत् ।
यतो वेतिश्रुतिर्ब्रूते चाहो ते महिमा महान् ॥ [११२]

उभयोरेकश्लोकेन गतार्थता ।

यद्वा वा विकल्पेन मा सम्पद्यस्य स वामः तत्सम्बुद्धिः । नोऽस्मानम जानीहि । गत्यर्थामधातोर्ज्ञानार्थत्वात् । अयं भावः । सम्पाद्धि चला कदाचिद्दैवानुकूल्ये त्वमाढ्यतमो भवसि अतोऽर्थदर्पादभिमानी भवासि अतोऽस्माद्विधानुदासीनांस्तृणीकुर्वन् शिरासि मूत्रयसि ष्ठीवसि अनेकप्रकारेण क्लेशयसि । दैवप्रातिकूल्ये तु सम्पाद्धीनः सन्नस्माद्विध इ। सम्पद्रहितो भविष्यासि अतः परमात्मानं भजेति तस्यैव द्विजवरस्योक्तिः ।

सम्पदश्चञ्चलाः शश्वन्नैकस्मिन् पर्युपासते ।
धनाभिमानं त्यक्त्वा त्वं भज देवं श्रियः पतिम्॥[११३]

यद्वा वा इवार्थः अमनः इति पृथक् । न विद्यते मा सम्पद्येषां ते अमाश्च ते वयं च अमास्मत्व तान् अमनः लुप्तविभक्तिप्रतिसन्धानेन पूर्वस्य पदत्वान्नसादेशः। दरिद्रान् अस्मानिव आत्मानं त्वम् अम जानीहि । अस्माकमिव तवापि दैवप्रातिकूल्ये दशा आगमिष्यति । अर्थोऽनर्थः "धिगर्थान् क्लेशकारिणः" इत्यादिद्विजवरस्याख्यायिका सूचीकटाहन्यायेनानुसन्धातव्या ।

दैवस्य प्रातिकूल्ये तु धनिकस्यापि मूर्द्धनि ।
निपतिष्यति दुःखं ते तस्माद्दर्पं परित्यज ॥ [११४]

यद्वा वा विविधा अणिमाद्यष्टविधैश्वर्याणि मा सम्पद्ये-

षां ते च ते वयमिति पूर्ववत्समासः। एतादृशः अस्मान् अम जानीहि। अयं भावः। अष्टविधैश्वर्याणि विरागिणं प्रार्थयन्ति अस्मान् गृहाणेति परं तु तान्यपि त्यजन्ति ईश्वरभजनविघातकत्वादिति धनमदमत्तं प्रति विरागिणामुक्तिः सूचीकटाहन्यायेन विस्तार्य प्रतिसन्धातव्या अलमतिविस्तरेण।

अष्टैश्वर्याणि ये त्यक्त्वा सेवन्ते भगवत्पदम्।
विरागिणो महाधन्यास्तानहं नौमि सर्वदा॥ [११५]

यद्वा वाम नः इतिच्छेदः। हे वाम! हे सुन्दर! त्वं नः बुद्धः इति बलिवचः। तस्यायं भावः। सप्तद्वीपाधिपतय इत्यादि शान्तिसन्तोषपरं वचो ब्रूषे पुनस्तव वेषोऽपि बुद्धस्यैव बुद्धोऽपि छत्राक्षमालादि धत्ते न तु खड्गादिकम्। अतो बुद्धोऽसीत्यनुमीयसे। "नकारः सौगते बुद्धो" इति कोशः।

बलिर्ब्रूते भवान्बुद्धो बुद्धवेषं धरन्यतः।
वामोऽसि त्वं छत्रधारी खड्गं नैव दधासि यत्॥ [११६]

यद्वा नः इव बुद्ध इव अम जानीहि। वा अम नः इतिच्छेदः। वा इवार्थः। भावस्तु पूर्ववत्।

आत्मानं त्वं विजानीहि बुद्धतुल्योऽस्मि वै वटो!।
अक्षमालां यथा बुद्धो धत्ते तद्वत् सदा भवान्॥ [११७]

यद्वा हे वाम हे दुष्ट! नामैकदेशन्यायेन हे वामदेव हे दुष्टदेव विरूपाक्ष हे नः हे पुमन्! वा निश्चयेन वामनोऽसि अम जानीहीत्यर्थः। अस्मिन् पक्षे वाक्यार्थस्यैव कर्मत्वम्। नः अस्माकं वा वाक्यार्थस्य कर्मत्वेन न वामशब्दात् द्वितीयापत्तिः। तदर्थस्य क्रियान्वयाभावात्। वाक्यार्थस्य क्रियान्वयेऽपि तस्यायोग्यत्वान्न द्वितीयापत्तिः।

वामदेव! विरूपाक्ष! दक्षयज्ञविनाशक!।

सतीपते ! वामनं त्वं जानीहि स्वं स्वयं विभो !॥ [११८]

यद्वा वामश्चासौ नाः तत्सम्बोधनम् । हे अतीवसुन्दरपुरुष बुद्ध एव इति अम जानीहि । आत्मानमिति शेषः । वा एवार्थः ।

अतीवसुन्दरो नास्त्वमात्मानं बुद्ध एव च ।
जानीहि पीतवासाश्च शान्तिवाक् श्रूयते तव ॥ [११९]

यद्वा वामपदं वामदेवपरम् । वामश्चासौ ना तत्सम्बोधनम् । वामदेव एव नररूपेणागतोसीति भावः ।

वामदेवो भवानद्य नररूपी समागतः ।
तेजसा वचसा बुद्ध्या मया त्वं चानुमीयसे ॥ [१२०]

यद्वा वामदेवरूपं पुमांसं अम जानीहि आत्मानमिति शेषः। 'पश्य मृगो धावति' इतिवद्वाक्यार्थस्य कर्मत्वेऽपि स एवार्थः ।

यद्वा हेवाम! हेसुन्दर ! नामैकदेशन्यायेन हेवामदेव ! हेनः हे पुमन् ! वा निश्चयेन वामनोऽसि अम जानीहि इत्यर्थः । अस्मिन्पक्षे वाक्यार्थस्यैव कर्मत्वम् ।

आत्मानं वामदेवं त्वं जानीहि नररूपिणम् ।
सर्वज्ञोऽसि मया वक्तुं नार्होऽसि क्षमयस्व माम्॥[१२२]

यद्वा वा विविधा मा सम्पद्यस्य स चासौ नः इति सम्बोधनम् । अष्टसिद्धिमत्पुरुषेत्यर्थः । एतेन भवन्तं निर्णेतुं नैव शक्नोमीति तात्पर्यम् ।

सिद्धयोऽष्टौ विराजन्ते त्वयि धन्योऽसि सर्वदः ।
तव को महिमानं हि लोको जानाति मां वद ॥ [१२३]

यद्वा हेवाम ! हे अतीवसुन्दर ! नोऽस्माकं नः नेता स्वामी भवानितिशेषः ।

हेवाम ! त्वं भवान्स्वामी पाहि मां किङ्करं सदा ।
स्वामी वै किङ्करं पाति तस्मात्स्वामी बुधैः स्मृतः ॥[१२४]

यद्वा नः तरणीर्नौका भवसागरतरणे इति भक्तोक्तिः।

तरणीर्वै भवानद्य भूतले चागतोऽसि भोः।
त्वत्तेजसर्त्विजो मेऽद्याभूवन्निस्तेजसो विभो! ॥[१२५]

यद्वा हेवाम! नः बुद्धिरेव भवान् "बुद्धिर्बुद्धिमतामस्मि" इत्युक्तेः।

यद्वा बुद्धिमतां बुद्धिर्भवानेवेति नो मतम्।
बुद्धिर्बुद्धिमतामस्मि वचस्ते भगवन्स्मर ॥ [१२६]

यद्वा हेवाम! नः अस्माकं नः स्वागतमस्तीतिशेषः।

स्वागतं ते नमस्तुभ्यं ब्रह्मन्किङ्करवाणि ते॥
बटो! कन्यां धनं भूमिं किमिच्छसि द्रुतं वद ॥ [१२७]

यद्वा नः अस्माकं नः बन्धुरेवेति इन्द्रादीनामुक्तिः। "नेता नश्च समाख्यातस्तरणौ नः प्रकीर्तितः। नकारः सौगते" "न-शब्दः स्वागते बन्धावृक्षे सूर्ये च कीर्तितः" इति कोशः। एष्वर्थेषु सूर्यः किलायातीत्यादि "स्वागतं ते नमस्तुभ्यं' इत्यादि भागवतं द्रष्टव्यम्।

इन्द्रस्तु वामनं दृष्ट्वा भ्राता मेऽदितिजो ह्ययम्।
सन्तुतोष बटुं दृष्ट्वा मायाहो बलवत्तरा ॥ [१२८]

यद्वा वामनो बटुरित्यत्र वा विविधं विकल्पात्मकं मनो यस्य स वामनाः स चासौ बटुरितिकर्मधारयः। बटुरेव विकल्पात्मकमना भवति। अद्येत्थं करोमि न करोमीत्यादि सङ्कल्पयतीतिभावः।

बटुर्वै वामना भूत्वा सङ्कल्प्य तु निषेधति।
तस्मात्तस्मिन्न विश्वासः कर्त्तव्य इतिभोः स्मर ॥ [१२९]

यद्वा हेवाम त्वं नः बुद्धः इति बलेरुक्तिः। तामसहमानस्य भगवतो हे आम! अपक्व! न वयो वृद्धः ज्ञानवृद्धोऽपि अम जानी-

हि विचारय मामितिशेषः। कृष्णाजिनं नहि पश्यसि, नहि बुद्धः कृष्णाजिनं धरति। तन्मतेऽहिंसाया एव परमधर्मत्वादिति भगवदभिप्रायः। तं बुद्धा बलिर्वाशब्दं प्रयुङ्क्ते कश्चिद्द्वेषो बुद्धसदृशः तेन बुद्धत्वप्रतीयसे। कृष्णाजिने दृष्टे तु जैमिनिनिभो दृश्यसे अतोऽत्र विषये विकल्प इति बलेरभिप्रायः।

बले ! त्वया वयोवृद्धा ज्ञानवृद्धा उपासिताः।
नो इत्यवेहि दैत्येन्द्र ! वामस्त्वं प्रतिभासि मे ॥
कृष्णाजिनं धरन्तं त्वं कथं बुद्धं ब्रवीषि माम्।
अहिंसा परमो धर्म इति तेषां मतं स्मर ॥ [१३०]

यद्वा नः बुद्ध इवाचरतीति नः इति आचारक्विबन्तात्कर्त्तरि क्विबस्तु। अर्थस्तु स एव।

बहुवेषधरं दृष्ट्वा बुद्धिर्मे संशयात्मिका।
बुद्धोऽसि किं कर्मकाण्डपरस्त्वमिति संशयः ॥ [१३१]

यद्वा हेवामन्निति मनिनन्तं सम्बोधनम्। अ इति आचारक्विबन्तात्कर्त्तरि क्विबस्तु। वासुदेव इवाचरसि। सोऽपि व्याजेनैव मागधादिकं हतवान् त्वमपि व्याजेनैवागतोऽसि कृष्णाजिनादिकं जैमिनीयं बिभर्षि बुद्धलाञ्छनमपि बिभर्षि अतो युञ्जानयोगी अहं तवाशयं व्याजपरं जानामीत्यभिप्रायः।

व्याजेन मागधं निघ्नन्वासुदेवोऽसि किं वद।
निर्णेतुमक्षमोऽस्मीति बटो ! सत्यं ब्रवीमि ते ॥ [१३२]

यद्वा हेवाम नः इत्यपि च्छेदो द्रष्टव्यः बटौ धर्मिणि अक्षमालादिबुद्धसाधर्म्याद्बुद्धोत्प्रेक्षा सा च वाचकलुप्ता।

बुद्धः किन्तु भवानित्थं शङ्कते मे मनो बटो !।
अतस्त्वां वामन इतिपदमाह बटो ! नमः ॥ [१३३]

यद्वा हेवाम ! हेदक्षिणमूर्ते ! नः शरणागतानस्मान्पाहीति

क्रियाध्याहारः । "सर्वं वाक्यं क्रियान्वितम्" इतिन्यायात् । भक्ता हि श्रीवामनं श्रीदक्षिणामूर्तिस्वरूपत्वेन स्तुवन्ति । न हि श्रीभगवतो मूर्तिं विहायान्या दक्षिणामूर्त्तिः। कोशास्तु प्राग्दर्शिताः ।

निधये सर्वविद्यानां भिषजे भवरोगिणाम् ।
गुरवे सर्वविद्यानां दक्षिणामूर्तये नमः ॥

इत्याद्युपनिषत्प्रतिपादिता दक्षिणामूर्तिर्भगवत इति निनिश्चिनोमि । यद्वा मास्तु तदध्याहारः। मनःशब्दस्यैवारोहक्रमेण पाठोऽस्तु पाठक्रमादर्थक्रमस्य बलीयस्त्वात् । तथा च हेवाम! हेदक्षिणामूर्ते! तुभ्यं नमः इत्यर्थस्यापि प्रतीतेः । आश्रयस्थानभागित्वादर्थबलाच्च विसर्गो मकाराकारमाश्रयतीति विचार्यम् । अत्र च भङ्गाभङ्गसङ्कीर्णश्लेष एव बलीयान् । क्रमतात्पर्येऽपि मन एव बलीयः ! अमुमेवार्थं वामनःपदमेव सम्बोधयतीत्युक्तमेव । तस्मात्केचनारोहणक्रमेण पठन्ति केचन तु अवरोहणक्रमेण । एतद्धि मनोवैकल्पिकत्वम् । तुल्यास्यसूत्रमवरोहणक्रमेण पठितम् । अकुहविसर्जनीयानां कण्ठ इति तु आरोहणक्रमेण । एतच्च सर्वं मनोविलसितमेव इति सर्वमनवद्यम् ।

कर्मान्ते दक्षिणा देया चान्यथा विफलं भवेत् ।
सर्वेषां फलदात्री सा दक्षिणामूर्त्तये नमः ॥ [१३४]

मया प्रदर्शिता अर्थाश्चतुस्त्रिंशच्छताधिकाः(१) ।
शेषार्थास्तस्य शेषो वै जानीयादिति मे मतम् ॥
अनन्ता यस्य वाच्याः स्युः कथं स ह्रस्वतां व्रजेत् ।
स्थूलदृश्वान एवाहुर्भूमानं वामनं क्वचित् ॥ इति ।

---

(१) अत्र निषेधन्तं कविमित्यस्य टिप्पणान्तर्गता अष्टावर्थाः तथाच शताधिका द्विचत्वारिंशदर्थाः ॥ १४२ ॥

उपसंहारः ।

कामादिबलिनो हंसि ततस्ते बलिहारिता ।
बुद्धिर्बुद्धिमतामस्मि बलिध्वंसिवचः स्मर ॥(१)
बलिना यत्कृतं दानं बलिनेव कृतं भवेत् ।
बटुनोपकृतिस्तस्य बटुनेव कृता भवेत् ॥
भूमन्वामन ! देवेश ! बटो ! मां पाहि किङ्करम् ।
नान्यन्मे शरणं लोके विना त्वां तापनाशकम् ॥
यथा वैरोचनिः प्राप तथा रात्रिन्दिवं प्रभो ! ।
प्राप्नुयां तव पादस्य दर्शनं तापखण्डनम् ॥
समास्त्रिंशत्कथं याता हाहाकारेण मे प्रभो ! ।
वाराणस्यां नो शृणोति सर्वज्ञः परिदेवनम् ॥
गताः समा द्वादश मे वृद्धकूपामृतामृतम् ।
पिवतोऽपि गदो नैव गतो मेऽदितिनन्दन ! ॥
प्राणाः कण्ठगता मेऽद्य गदिनो मे कथं भवेत् ।
अनन्त ! तेऽभिधानस्य विवृतिः पुण्यदायिनी ॥
इति चिन्तानिमग्नोऽपि त्वत्प्रसादाद्यथामति ।
अकार्षं क्षम्यतां देव ! यदि स्यान्न्यूनतापि च ॥
इमां संस्मृत्य संस्मृत्य गच्छेयुरसवोऽपि मे ।
एतावत्कालपर्यन्तमेतदर्थं न मां जहुः ॥
वासवानुज ! मां प्राणा जह्युर्द्राक् शं भवेन्मम ।

---

(१) अस्यार्थः। बलिध्वंकसत्वेन न तव बलिहारिता किन्तु बलेऽपि बलिनो ये कामक्रोधादयस्तद्ध्वंसकत्वेनैव बलिहारिता अर्थान्तरे हंसस्य परमात्मनः स्त्री हंसी तत्सम्बोधने हेहंसि ! हेबुद्धे । हंसपदेन परमात्मा श्रुतिस्मृतिपुराणकाव्येषु प्रसिद्धः। काव्ये यथा -"हंसोऽपि देवांशतयासि वन्द्य" इति श्रीहर्षः। तस्य स्त्री बुद्धिरपि "तस्यां गर्भं दधाम्यहं' इत्यादिस्मृतिप्रसिद्धा । ईश्वरोऽपि बुद्धिरेव "बुद्धिर्बुद्धिमतामस्मि" इति त्वयैवोक्तेः। अतः हेहंसि हेबुद्धे हेपरमात्मन् ! हेवामन ! कामक्रोधादिबलवत्तरान् शत्रून् हंसि नाशयासि अत एव तव बलिहारिता न तु दितिजबलिध्वंसनमात्रेणेति ।

मद्विधानां दुर्विधानामन्ते नामस्मृतिः फलम् ॥
दानानि दत्तानि सकृन्मया नो तीर्थावगाहश्च कृतः सकृन्नो ।
पूजापि ते देव ! सकृत्कृता नो भक्तं स रक्षेदसकृत्कुतो नो ॥
उपाचिता वामननामकौमुदी सुधीमनःकौमुदकौमुदी भुवि ।(१)
अहो उमानाथकृतिः सदोदियाच्छ्रुतादराद्वा पठिता ददाति शम् ॥
सम्पाद्य यो वामनकायमस्मादाच्छिद्य नाकं प्रददौ बलेः सः ।
भ्रात्रे स्वनामार्थनिविष्टचित्तानापत्समुद्रान्न हि किं सुरक्षेत् ॥
मात्सर्यमुत्सार्य विचारणीया अर्था इमे वामनपादलब्धाः ।
आपद्घनध्वान्तसहस्रगावः संसारसिन्धौ पतितस्य नावः ॥
पाठाच्छ्रुतेर्वापि निहन्ति पापं भक्त्या भजद्भ्यो भगवाननन्तम् ।
फलं ददातीह परत्रलोके प्रापद्यथेन्द्रस्त्रिदिवं बलिश्च ॥
दण्डं ततोऽनुग्रहमेव कुर्वन् स्वामी लभेतेश्वरतां न चान्यः ।
पूर्वं बलिं दण्डयमान एव पश्चादधोराज्यमदात्प्रभुर्मे ॥
पूर्वं न दैत्या विविदुः प्रसादं वैरोचनिः प्रापदहो महात्मा ।
इदं न चित्रं यत एव तस्मै दानं ददत्तत्फलमेव भुङ्क्ते ॥
दण्डं विना नैव बलिस्त्रिलोकीं त्यजेद्विनिश्चित्य चकार दण्डम् ।
दण्डान्मरुद्वाति दिवाकरः को मृत्युस्तथा बिभ्यति भूतसङ्घाः ॥
स्वाराज्यमीप्सुं पुनरेव देवो बलिं करिष्यत्यचिरेण चेन्द्रम् ।
तस्मान्मुनेः सत्यगिरो गिरश्च श्रूयन्त इन्द्रो बलिरेव भावी ॥
कस्यापि मूर्द्धनि हरिर्न पदं रमाया आस्थापयत्परमभागवतस्य तस्य ।
वैरोचनेः परमभाग्यमतस्तु किं वा केनोपदिष्टमिह तत्समदस्तपस्तत् ॥

श्रीभगवदभ्यर्थना ।

आदावनेकलोकांस्त्वं स्रष्टुं दध्रे हि पौरुषम् ।
महदादिसमूहं तद्गतिर्मे भवसागरे ॥ १ ॥
हयग्रीवं निहत्याजौ वेदोद्धारं चकार यः ।
स मत्स्यरूपमादाय गतिर्मे भवसागरे ॥ २ ॥
काच्छपं रूपमादाय धरित्रीं यो दधार सः ।
पृष्ठे जलाप्लुतां देवो गतिर्मे भवसागरे ॥ ३ ॥
दंष्ट्रिरूपं गृहीत्वाजावादिदैत्यं जघान यः ।
दधौ स भूमिं दंष्ट्रायां गतिर्मे भवसागरे ॥ ४ ॥

---

(१) कुमुदमेव कौमुदम् स्वार्थेऽण् ।

नारसिंहं वपुर्गृह्णन् प्रह्लादं यो ररक्ष सः ।
दयापूर्णमना नित्यं गतिर्मे भवसागरे ॥ ५ ॥
वामनं देहमादाय बलिमच्छलयद्भवान् ।
बटो ! नमोऽस्तु ते विष्णो ! गतिर्मे भवसागरे ॥ ६ ॥
त्रिःसप्तकृत्वो राजन्यान्यो जघान च मातरम् ।
पित्राज्ञया जामदग्न्यो गतिर्मे भवसागरे ॥ ७ ॥
रामरावणमाजौ यो हत्वा, जनकनन्दिनीम् ।
प्राप्यायोध्यां गतः स्वस्थो गतिर्मे भवसागरे ॥ ८ ॥
रौहिणेयो भवन्दुष्टं प्रलम्बासुरमेव च ।
अहश्नीलाम्बरो यः स गतिर्मे भवसागरे ॥ ९ ॥
निघ्नन्यज्ञविधिं बुद्धो भवन्पशुवधं च यः ।
त्याजयामास स ज्ञानी गतिर्मे भवसागरे ॥ १० ॥
म्लेच्छभारैरतिक्रान्तां भुवं लघ्वीं चकार यः ।
हयारूढः स खड्गी त्वं गतिर्मे भवसागरे ॥ ११ ॥
सुधाकलशमादाय समुद्रादुत्ततार यः ।
धन्वन्तरिः स भगवान् गतिर्मे भवसागरे ॥ १२ ॥
मोहिनीरूपमादाय मोहयित्वा सुरासुरान् ।
तेभ्यो ददौ हरिर्व्याजी गतिर्मे भवसागरे ॥ १३ ॥
मधुं सकैटभं निघ्नन् वेदोद्धारं चकार यः ।
हयग्रीवतनुं धृत्वा गतिर्मे भवसागरे ॥ १४ ॥
वसुदेवसुतो भूत्वा राज्ञोऽहन्नसुरांश्च यः ।
भारं जहार भूमेः स गतिर्मे भवसागरे ॥ १५ ॥
दत्तात्रेयोऽवधूतो यः शिक्षमाणो विरागिणः ।
सोऽवतारः शान्तिपरो गतिर्मे भवसागरे ॥ १६ ॥
वैन्यो गिरीन्धनुष्कोट्या स्थापयायास तूलवत् ।
यज्ञे प्रादुरभूद्विष्णुर्गतिर्मे भवसागरे ॥ १७ ॥
त्रिवेदीव्यसनादेव व्यासोऽभूद्दश चाष्ट च ।
पुराणानि चकार त्वं गतिर्मे भवसागरे ॥ १८ ॥
ध्रुवो भूत्वा तपस्तप्त्वा पञ्चहायन एव यः ।
ज्योतिश्चक्राधीश्वरः स गतिर्मे भवसागरे ॥ १९ ॥
हंसो ब्र सभामेत्य मनोविषययोः पृथक् ।

एवञ्चेद्भविता स्मात्थ गतिर्मे भवसागरे ॥ २० ॥
नरनारायणौ भूत्वाऽवतिष्ठेते तपः परौ ।
लोकरक्षार्थमद्यापि गतिर्मे भवसागरे ॥ २१ ॥
नाम्ना यः कपिलः ख्यातः साङ्ख्यं प्रोवाच विस्तरम् ।
आदिविद्वान्विरागी स गतिर्मे भव सागरे ॥ २२ ॥
नाम्ना यो नारदः ख्यातः पञ्चरात्रमुवाच सः ।
भक्तानामुपकाराय गतिर्मे भवसागरे ॥ २३ ॥
मूर्द्ध्नर्नन्तामनन्तो यो बिभ्रल्लोकांश्चतुर्द्दश ।
प्रलयान्ते स वै शेषन् (१)गतिर्मे भवसागरे ॥ २४ ॥
तापत्रयविदग्धस्य कालिखिन्नमनीषिणः ।
स्थाविरस्य दयापूर्ण ! श्रूयतां परिदेवनम् ॥ २५ ॥

अयि विद्वांसो लघुभागवतामृतादा अनेकपुराणाद्युक्तावतारसङ्ग्रहेणावताराः प्रदर्शिताः सन्ति यथाकथञ्चिद्भगवन्नामोच्चारणेन संसारकूपादात्मानमुद्धर्तुकामोऽहमेतावदवतारान्सङ्गृह्य भगवन्नामास्मार्षम् नहि सत्त्वनिधेर्भगवतोऽशेषानवतारान्सङ्गृह्य गणयितुमीशे ॥

व्यासादयोऽपि गणने प्रभवो न चास-
न्तस्माद्दृशो मतिविहीननरः कथं स्यात् ॥
हेऽनन्त ! साहसमहो भगवन् ! क्षमस्व
त्वं मे सदा शरणमेव दयासमुद्रः ॥

गुणवस्वङ्कविधुभिर्मिते विक्रमवत्सरे ।
सौरपौषस्य दशमे दिवसे शनिवासरे ॥
उमानाथेन विदुषा काश्यां निर्माय सादरम् ।
समर्पितः प्रबन्धोऽयं श्रीवामनपदाब्जयोः ॥

इति श्रीमदतिप्रचण्डभुजदण्डेत्यादिविरुदावलीविराजमानानां नेपालसम्राजां श्रीश्रीश्रीश्रीश्रीगीर्वाणयुद्धसाहदेवानां पुरोधःकुलावतंसश्रीमद्यदुनाथसूरिसूनोर्विद्वद्वरश्रीरामनाथशर्मणः पौत्रस्य पण्डितश्रीब्रह्मनाथशर्मणः पुत्रस्य उमानाथशर्मणः कृतिर्नवरसरुचिरा वामननामकौमुदी समाप्ता ।

---

(१) शिष असर्वोपयोगे आधृषाद्वेतिणिज्विकल्पः ततो लटः शता शपि गुणः ।

शुद्धिपत्रम् ।

				अशुद्धम्	शुद्धम्
पृ०	९	पं०	६	कार्यकालत्तेशुद्ध	कार्यकालपदेऽशुद्ध
,,	१०	,,	१२	स वततार	सन् अवततार
,,	,,	,,	१६	काव	कविं
,,	,,	,,	२०	प्रतिश्रत्य	प्रतिश्रुत्य
,,	२४	,,	७	निषेधधयन्तो	निषेधयन्तो
,,	२५	,,	२०	तथाचोङ्कारो	तथाचौङ्कारो
,,	२६	,,	५	दुक्तोङ्कारस्य	दुक्तौङ्कारस्य
,,	२९	,,	२१	शरिमे	झारिमे
,,	,,	,,	३०	समीपवतरर्ति	समीपतरवर्ति
,,	४४	,,	३	निस्तेत्तसो	निस्तेजसो

इयं वामनकौमुदी मूल्यं विनैव लभ्यते प्रकाशकसकाशाद्ग्रन्थ-कर्तृसकाशाद्वा ।

प्राप्तिस्थानम्—

पं० उमानाथ शर्मा

श्रीकाशीराजपुरोहितगृहम् ।

मु० दुग्धविनायक, काशी ।

न्थ-

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

द्ग्रन्थ-

प्राप्तिस्थानम्—

पं० उमानाथ शर्मा

श्रीकाशीराजपुरोहितगृहम् ।

मु० दुग्धविनायक, काशी ।

अनेन विद्वद्वरेण निर्मिताः प्रबन्धाः

१ जागदीशपञ्चलक्षणीविवृत्तिर्व्याप्तिचन्द्रिकाभिधा ।
२ तदीयव्यधिकरणविवृतिः ।
३ तदीयावच्छेदकत्वनिरुक्तिविवृतिः ।
४ माथुरपञ्चलक्षणीविवृतिः (काश्यां विद्याविलासयंत्रे मुद्रिता)
५ तदीयव्यधिकरणविवृतिः ।
६ तदीयाभासविवृतिः ।
७ सिंहव्याघ्रविवृतिः ।
८ अदूर्ध्वभागपर्यन्तं गादाधरसिद्धान्तलक्षणीविवृतिः ।
९ गादाधराभासविवृतिः ।
१० सार्वभौमविवृतिः ।
११ अनुमानखण्डान्तं मुक्तावलीविवृतिः ।
१२ प्रतियोगिताविचारः ।
१३ एकक्रियाधर्मितयेतिकारिकापर्यन्तं शब्दशक्तिप्रकाशिकाविषमटिप्पणम् ।
१४ लघुशब्देन्दुशेखरविवृतिः कारकान्ता ।
१५ सम्पूर्णपरिभाषेन्दुशेखरविवृतिः ।
१६ ङःसिधुट्सूत्रपर्यन्तं शब्दरत्नविवृतिः ।
१७ द्वितीयाकारकपर्यन्तं व्युत्पत्तिवादविषमटिप्पणम् ।
१८ पद्मावतीचरणचारणचक्रवर्त्तीत्येकपदस्यार्थाः २२ ।
१९ श्रीरामगीतासंस्कृतटीकार्थप्रकाशिका भाषाटीका ।
२० श्रियःकुरूणामित्येकश्लोकार्थाः २२७ ।
२१ अथप्रजानामित्येकश्लोकार्थाः ~~६२~~ ।९२.
२२ पूर्वविद्वत्सम्प्रदायागतं दर्शनीयतमंनैषधविषमटिप्पणमनेकार्थक
२३ वामननामकौमुदी (वामनपदस्य १४२ अर्थाः । मुद्रिता
२४ गोपीगीतार्थकौमुदी । गोपिकास्तुतेर्व्याख्या ।

(मुद्रिता वर्तते)

यल् मणि एन्ड, को०
बनारस क्यान्ट ।
इत्यत्र लभ्यते मू० १ मुद्रा ।